This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

Accession: NO: - 4732 M1296.
Title: - प्रकीया भूषण
Author: - श्रीनिवासदास
subject: - व्याकरण -
पत्र: - 18+36 = 54.

Checked 2012

K.K.S.U. LIBRARY
RAMTEK
441 106
M-1296
Dist. Nagpur

4732

॥श्रीद्वायरामभेदंपुस्तकं॥

प्र० भू० श्रीमतेरामानुजायनमः श्रीशंनत्वागुणार्णवासंक्रियतेलघुसंविदे श्रीश्रीनिवासदासेनप्रक्रियाभूषणं
१ गिरः १ अइउऋऌसमानाः अनेनक्रमेणैते वर्णाज्ञेयास्तेचसमानसंज्ञास्युः नैतेषुसूत्रेषुसंधिरविवक्षि
तत्वाद्विवक्षितस्तुसंधिस्यात् ह्रस्वदीर्घप्लुतभेदाःसवर्णाः एषांह्रस्वादिभेदाः परस्परंसजातीयाःसवर्णाःस्युः
एकमात्रोह्रस्वः द्विमात्रोदीर्घः त्रिमात्रःप्लुतः व्यंजनमर्द्धमात्रकं एषामुदात्तादिभेदाः अपिस्युः उच्चैरुदात्तः
नीचैरनुदात्तः समवृत्तिःस्वरितः अनुनासिकोननुनासिकश्च एऐओऔसंध्यक्षराणि एषांह्रस्वानस्युः उभ
येस्वराः अकारादयः एकारादयश्चोभयेस्वराःस्युः अवर्जानामिनः अवर्णवर्जास्वरानामिनःस्युः अथहसा
उच्यंते हयवरलञणनङमझढधघभजडदगबखफछठथचटतकपशषस आद्यंताभ्यांप्रत्याहारायथा
द्यंताभ्यांसहैतेवर्णाग्राह्याः आदिरंतेनसहगृह्यमाणस्तन्नामप्रत्याहारः अइउऋऌएऐओऔहयवरल
ञणनङमझढधघभजडदगब इत्येवंप्रत्याहारः चटतकपइतिचप जडदगबइतिजब एवंझनङलप्रभृतिः
हसाव्यंजनानि हादयःसांताहसाव्यंजनानिस्युः तेष्वदुच्चारणार्थः कार्यापेत् कार्यायोच्चार्यमाणोवर्णोऽस्तसं
ज्ञःस्यात् यस्यैवतत्संज्ञातस्यलोपः वर्णादर्शनंलोपः प्रसंगयादर्शनेलुक् वर्णविरोधीलोपस्य मित्रवदागमः
शत्रुवदादेशाः स्वरानंतरिताःहसाःसंयोगः कुचुटुतुपुवर्गाः अकारात्पंचमोवर्णस्तमाहुःपंचकंयहेङ
तिवचनात्उकारः अरेदोन्नामिनोगुणः अरएदोगुणसंज्ञिकास्तेनामिनःस्थानेस्युः आरैदौवृद्धिः आआ च२
रऐऔवृद्धिसंज्ञास्युः अंत्यस्वरादिष्टिः अंत्यस्वरादिवर्णोष्टिसंज्ञःस्यात् अंत्यात्पूर्वउपधा अंत्याद्वर्णमात्रा

१

त्पूर्वो यो वर्णः स उपधासंज्ञः असंयोगादिपरो ह्रस्वो लघुः विसर्गानुस्वारसंयोगपरो गुरुः दीर्घश्च मुखनासि
कावचनोनुनासिकः तपरस्तावन्मात्रार्थः बिंदुरनुस्वारः बिंदू विसर्गः इति संज्ञा॥ अथ स्वरसंधिरभिधी
यते दधि आनय इति स्थिते इयं स्वरे इवर्णो यत्वं याति स्वरे परे हसे हूसः स्वरात्परो रहवर्ज्जो हसो हसे परे द्विः
ति ८ स्यात् यद्यादेशस्तद्वत्स्यादिति यस्य हसा ना वे प्राप्तिन तु वर्णमात्रविधाविति वर्णमात्रविधेर्न द्वित्वनिषेधः इ
तिधस्य द्वित्वं झबे जबाः झसानां झबे परे जबाः स्युः इति पूर्वधस्य दः वर्गे वर्ग्येण सवर्णो इति वचनाव यथा
संख्यं वा वक्तव्यं स्वरहीनं परेण संयोज्यं दध्यानय इति सिद्धं गौरी अत्र गौर्य्यत्र द्विः स्वरपूर्वाद्रेफात्परो य
पो द्विः स्यात् जलतुंबिकावद्रेफो ह्यूर्ध्वगमनं गौर्य्यत्र हर्य्यनुभवः सूत्राद्धरिः कार्यासिद्धौ सूत्रांतरात्प्रयत्नांतराद
नुवृत्तिर्ज्ञेया उवं उवर्णो वत्वं याति स्वरे परे मधु अत्र मध्वत्र ऋरं ऋवर्णो रत्वं याति स्वरे परे पितृ अर्थः पि
त्रर्थः लृलं लृवर्णो लत्वं याति स्वरे परे लृ अनुबंधः लनुबंधः एअय् एदय् स्यात्स्वरे ने अनं नयनं ओअव्
ओदव् स्यात्स्वरे लो अनं लवनं गवादेरतादावश्च वक्तव्यः टिल्लिता वाद्यं तयोर्वक्तव्यौ गो अग्रः गवाग्रः गो
इंद्रः गवेंद्रः प्र ऊढः प्रौढः अक्षऊहिणी अक्षौहिणी स्वईरं स्वैरं क्वचित्स्वरवद्यकारः गोयूतिः गव्यूतिः ए
आय् एकारस्यायस्यात्स्वरे नै अकः नायकः औ आव् औकारस्यावस्यात्स्वरे लौ इह लाविह य्वोर्लोपश्च
वा पदांते पदांते स्थितानां यादीनां यवयोर्लोपश्च वा स्यात् ते आगताः त आगताः तयागताः पट इह
पट इह पटविह तस्मै इदं तस्मा इदं तस्मायिदं लौ इह ला इह लाविह लोपश्चेन्न संधिः छंदसि तु स्या

अ०म०
२
सितिः

ता १

त् हे सखे इति हे सखेति हे सखयिति न लोपश्चपि दामन् उदरः दामोदरः एदोतोतः पदांते स्थितेदोतोभ्यां
परस्यातो लोपः स्यात् ते अत्र तेत्र पटो अत्र पटोत्र सवर्णे दीर्घः सह सवर्णस्य सवर्णे परे सह दीर्घः स्यात् श्र
द्धा अत्र श्रद्धात्र पर्जन्यवल्लक्षणप्रवृत्तिन्यायात् दीर्घस्यापि दीर्घः दंड अग्रं दंडाग्रं दधि इदं दधीदं भानु उद
य भानूदयः सामान्याद्विशेषो बलवान् परेण पूर्वो बाधो वा प्रायश इत्युक्ते इयं स्वरे इत्यादिना अ इ ए अवर्णे
इवर्णे परे सह ए स्यात् तव इदं तवेदं हलादेरीषादेर्लोपो वक्तव्यः हल ईषा हलीषा लांगल ईषा लांगली
षा मनस् ईषा मनीषा सीमन् अंतः सीमंतः कुल अटा कुलटा पतत् अंजलिः पतंजलिः आकृतिगणोयं
उ ओ अवर्णे उवर्णे परे सह ओ स्यात् गंगा उदकं गंगोदकं ऋ अर् अवर्णे ऋवर्णे परे सह अर् स्यात् तव ऋद्धिः
तवर्द्धिः क्वचिदार् अवर्णे ऋवर्णे परे सह क्वचिदार् स्यात् ऋण ऋणं ऋणार्णं शीत ऋतः शीतार्तः लृ अल् अ
वर्णे लृवर्णे परे सह अल् स्यात् तव लृकारः तवल्कारः ऋलृवर्णयोर्मिथः सावर्ण्यं वाच्यं होतृ लृकारः होत्लृ
कारः रलयोः सावर्ण्यं वाच्यं परि अंकः पर्यंकः पल्यंकः ऐ ऐ अवर्णे एकारे ऐकारे च परे सह ऐ स्यात् तव ए
षा तवैषा तव ऐश्वर्यं तवैश्वर्यं औ औ औ अवर्णे ओकारे औकारे च परे सह औ स्यात् तव ओदनं तवौदनं त
व औनित्यं तवौनित्यं ओष्ठौत्वोर्वा अवर्णस्य ओष्ठौत्वोः परयोर्वा सह औ स्यात् समासे बिंब ओष्ठः बिंबोष्ठः बिं
बौष्ठः स्थूल ओतुः स्थूलोतुः स्थूलौतुः समासे किं तवौष्ठः इति स्वरसंधिः नामी अदसोऽमीशब्दः संधिं न
याति अमी आदित्याः देद्वित्वे ईदंत ऊदंत एदंत [illegible] द्वित्वे वर्तमानः संधिं न याति अमी अत्र पटू अत्र

२

त्पूर्वो यो वर्णः स उपधासंज्ञः असंयोगादिपरो ह्रस्वो लघुः विसर्गानुस्वारसंयोगपरो गुरुः दीर्घश्च मुखनासि
कावचनोनुनासिकः तपरस्तावन्मात्रार्थः बिंदुरनुस्वारः बिंदू विसर्गः इति संज्ञा ॥ अथ स्वरसंधिरभिधी
यते दधि आनय इति स्थिते इयं स्वरे इवर्णो यत्वं याति स्वरे परे हसे हसः स्वरात्परो रहवर्जो हसो हसपरो द्विः
ति७ स्यात् यद्वा देशस्तद्वत्स्यादि यस्य हसा नावेप्राप्तिर्न तु वर्णमात्रविधाविति वर्णमात्रविधेर्न द्वित्वनिषेधः इ
ति धस्य द्वित्वं झबे जबाः झसानां झबे परे जबाः स्युः इति पूर्वधस्य दः वर्गो वर्ग्येण सवर्णो इति वचनात् यथा
संख्यं वा वक्तव्यं स्वरहीनं परेण संयोज्यं दध्यानय इति सिद्धं गौरी अत्र गद्योद्विः स्वरपूर्वो रेफात्परो य
यो द्विः स्यात् जलतुंबिकावद्रेफो ह्यूर्ध्वगमनं गौर्य्यत्र हय्यनुभवः सूत्रात् हरिः कार्यसिद्धो सूत्रांतरात्पदांतराद
नुवृत्तिर्ज्ञेया उवं उवर्णो वत्वं याति स्वरे परे मधु अत्र मध्वत्र ऋरं ऋवर्णो रत्वं याति स्वरे परे पितृ अर्थः पि
त्रर्थः लृलं लृवर्णो लत्वं याति स्वरे परे लृ अनुबंधः लनुबंधः एअय एद् यस्मात् स्वरे ने अनं नयनं ओअव
ओद् अवस्मात् स्वरे लो अनं लवनं गवादेरज्ञा दावाव्रवक्तव्यः इति वा शब्दः तयोर्वक्तव्यो गो अग्रः गवाग्रः गो
इंद्रः गवेंद्रः प्र ऊढः प्रौढः अक्ष ऊहिणी अक्षौहिणी स्व ईरं स्वैरं क्वचित्स्वरवद्यकारः गो यूतिः गव्यूतिः ऐ
आय् ऐकार आय् स्यात् स्वरे ने अकः नायकः औ आव् औकार आव् स्यात् स्वरे लौ इह लाविह य्वोर्लोपश्च
वा पदांते पदांते स्थितानां यादीनां यवयोर्लोपश्च वा स्यात् ते आगताः त आगताः तयागताः पटो इह
पट इह पटविहः तस्मै इदं तस्मा इदं तस्मायिदं लौ इह ला इह लाविह लोपश्चेति न संधिः छंदसि नुस्या

मा लि आ आनय ओ निपातः एकस्वरो निपातः संधिं न याति आ एवं मन्यसे नो अत्र स्यात् यं अ अपेहि दुरुत्तिष्ठ दूरा

प्लुतः स्यात् २ दाह्वाने दूरात्संबोधने वा वाक्यस्य टेः प्लुतः संधिं न याति देवदत्त३अत्र हि हे हैप्रयोगे हेहयोः प्लुतो वा हे३अं व

हाय वहे दूराद्धूयोः अप्लुतवदिति देवदत्तेति इति प्रकृतिः ङ्णपा अवे ञवा पदांते वर्त्तमानाच्छपाञवाः स्यु

रवि परे अच् अंतः अजंतः षट् अत्र षड् अत्र ञमे ञमा वा पदांते वर्त्तमानाच्छपाञमे परे ञमा वा स्युः वाक् मात्रं

वाङ्मात्रं वाग्मात्रं प्रत्यये ञमे ञवस्यापि नित्यं ञमाः तद् मयं तन्मयं ङ्णपाच्छः शः ङ्णपाद् उत्तरस्य शस्य छो वा

स्यात् वाक् शूरः वाक् छूरः होऽर्भाः ङ्णपाद् उत्तरस्य हस्य ऊर्भा वा स्युः यद्वर्गग्रः पच्छस्तद्वर्गग्रच्छ तुर्थः तत

वाग्घरिः १ हविः तद्धविः तद्हविः वाक् हरिः वाग्घरिः स्तोः श्चुभिः श्चुः सकार तवर्गयोः शकार चवर्गाभ्यां योगे य

थासंख्येन शकार चवर्गौ स्तः उद्दिश्यमानप्रतिनिर्दिश्यमानयोः संख्यासाम्ये यथाक्रममिति वाच्यं कश्च

चरति कश्चरति कस् शूरः कश्शूरः तत् चित्रं तच्चित्रं तत् शास्त्रं तच्छास्त्रं न शात् शाद् उत्तरस्य तवर्गस्य श्चु

त्वं न स्यात् विश्नः विश्नः प्रश्नः ष्टुभिः ष्टुः सकार तवर्गयोः षकार टवर्गाभ्यां योगे षकार टवर्गौ स्तः कस् षष्ठः

कष्षष्ठः कस् टीकते कष्टीकते तत् टीकते तट्टीकते तत् टीका तट्टीका न षि षकारे परे तवर्गस्य ष्टुत्वं

न स्यात् सन् षष्ठः टोरंत्यात् पदांते वर्त्तमानात् टवर्गात् परस्य स्तोः ष्टुर्न स्यात् षट् नरः षड् नरः षट् सीदति

षट्सीदति तोर्लि लः तवर्गस्य ले परे लः स्यात् तत् लुनाति तल्लुनाति भवान् लिखति अनुनासिकान

न २ नुनासिकत्वेन द्विधा यवलास्तत्र सानुनासिकस्य लः स्यात् नः सकुछते नांतस्य पदस्य छते परे सगागमः

स्यात् राजन् चित्रं राजंश्चित्रं भवांस्तनोति सिचकुवा नांतस्य पदस्य शे परे वा चगागमः भवान् शूरः भवाञ्छूरः

प्र०सू०
३

नवाऽश्वमूरः नवाऽमूरः ङ्णो ह्रस्वाद्द्विः स्वरे ङ्णौ ह्रस्वादुत्तरौ द्विः स्युः स्वरे पदान्ते प्रत्यङ्ङ्इदं प्रत्यङ्ङिदं सु
गण्णिह राजन्निह छः ह्रस्वादुत्तरः छो द्विः स्यात् खसे चपा झसानां झसानां खसे चपाः स्युः तवच्छत्रं तवछ
त्रं क्वचिद्दीर्घोऽपि वक्तव्यं ह्रीच्छः ह्रीछः मोऽनुस्वारः मस्यानुस्वारो हसे पदान्ते च तम् हसति तं हसति न
श्चापदान्ते झसे नस्य मस्य चापदान्ते वर्तमानस्यानुस्वारो झसे परे यशान्सि यशांसि पुमन्स्यां पुंस्यां य
मायपेस्य अपदान्ते वर्तमानस्यानुस्वारस्य यमाः स्युर्यपे परे अस्य यपस्य सवर्णाः शान्तः अङ्कितः वा पदा
न्ते वर्तमानस्यानुस्वारस्य यमा वा स्युः तंकरोति तङ्करोति यवलपरे यवला वा अनुस्वारस्य यवला वा स्युर्य
वलपरे संयंता सँय्यंता संवत्सरः सँव्वत्सरः यंलोकं यँल्लोकं स्वरे मः अनुस्वारस्य मादेशः स्यात्स्वरे तंअ
स्ति तमस्ति ꣳ छः हसि छः हस्यानुस्वारो ꣳ याति शषसहरेफेषु परतः हंसः हꣳसः तंह तꣳह तंरविः
तꣳरविः इति हससंधिः विसर्जनीयस्य सः विसर्गस्य सः स्यात् खसे परे कः तनोति कस्तनोति शषसे
वा विसर्गस्य सो वा स्यात् शषसे परे कः शेते कश्शेते कः षंडः कष्षंडः कः साधुः कस्साधुः कुप्वोः कᳵपौ
वा विसर्गस्य कुपुसंबंधिनि खसे परे कᳵपौ स्तः कपावुच्चारणार्थौ कः करोति कᳵकरोति कः पचति
कᳶपचति वाचस्पत्यादयः संज्ञाशब्दा निपातात् साधवः वाचस्पतिः बृहस्पतिः तस्करः इत्याद्या आकृति
गणः रो रात्रिषु अह्नो विसर्गस्य पदान्ते रः स्यात् न तु रात्र्यादिषु अहः पतिः अहर्पतिः अहरात्रं अहोरात्रं
अहः रूपं अहोरूपं अतो त्युः अतः परस्य विसर्गस्य उः स्यात् हशि परतः कः अर्थः कोऽर्थः हवे अतः पर

परे२

३

स्य विसर्गस्य उः स्याद्धवे कः गतः कोगतः आद्धवे लोपश्च अवर्णात्परस्य विसर्गस्य लोपश्च स्याद्धवे परे देवाः अत्र देवा अत्र स्वरे यत्वं वा विसर्गस्य स्वरे परे यत्वं वा स्यात् देवायत्र भोसः भोस्भगोस्अघोसः इत्येतस्य विसर्गस्य लोपश्च स्याद्धवे भोः एहि भोएहि भगोः नमस्ते भगोनमस्ते अघोः याहि अघोयाहि नामिनो रः नामिनः परस्य विसर्गस्य रेफः स्याद्धवे परे अग्निः अत्र अग्निरत्र रेफः प्रकृतिकस्य खपे वा रेफः प्रकृतिकस्य विसर्गस्य खपे वा रेफः स्यात् गीः पतिः गीर्पतिः गीᳶपतिः रः रेफसंबंधिनो विसर्गस्य रेफोऽवे परे प्रातः अत्र प्रातरत्र रि लोपो दीर्घश्च रेफस्य रेफे परे लोपः स्यात्पूर्वस्य दीर्घः पुनः रमते पुनारमते हरिः राजते हरीराजते सैषाद्धसे सशाद्धादेषशाद्धाच्च परस्य विसर्गस्य लोपः हसे परे सः चरति सचरति एषः हसति एषहसति सशाद्धाद्विसर्गस्य लोप एव स्वरे पादपूर्णं चेत् सैषदासरथी रामः इत्यादौ यदुक्तं लोकिकार्ये हलढे दे बहुलेन चेत् सेमां भस्याद्दे सैषामित्यादौ नाम दुष्टता १ बहूर्थं दंब-हुलं इति विसर्गसंधिः अथ विभक्त्यधिकारः अविभक्ति नाम विभक्तेर्धातोश्चान्यदर्थवच्छ स्वरूपं नामोच्यते कृत्तद्धितसमासाश्च प्रातिपदिकसंज्ञा इति केचित् तस्मात् सि औ जस् अम् औ शस् टा भ्यां भिस् ङे भ्यां भ्यस् ङसि भ्यां भ्यस् ङस् ओस् आम् ङि ओस् सुप् ७ नाम्नः परा स्याद्विभक्तयः सुः तत्रैकत्वविवक्षायां प्रथमैकवचनं देव सि सि उस्मा इकारो जशटङपाश्चेतः सुः सो विसर्गः सरेफयोर्विसर्गो देवः स्याद्धातो रसे पदांते च देवः द्वित्वविवक्षायां देव औ देवौ बहुत्वविव

ढ्रे
स्यात् १

प्र०१० त्नायां देव जस् जस्य लोपः दीर्घ विसर्गौ देवाः अतो जसोऽसुक् क्वचिद्धक्तव्यः देवासः देव अम् अम्
४ शसोरस्य समानादुत्तरयोरमशसोरतो लोपः स्यादधातोः देवं देवौ शसि शसि परे पूर्वस्य दीर्घः स्यात्।
सो नः पुंसः पुल्लिंगात्समानात्परस्य शसः सस्य नादेशः स्यात् न त्वाम् शसीत्यात्वे देवान् टेनः अतः परस्य
इनः स्यात् देवेन अद्भि अत आ स्याद्भकारे देवाभ्यां भिसः अतः परस्य भिसो नस्यादादेशः स्यात् देवैः
अतो भिसि छंदस्य हुक्तव्यः देवेभिः ङेर्यः अतः परस्य ङे इत्येतस्यागागमः ए अय दीर्घः देवाय देवा
भ्यां एस्भि बहुत्वे अत एत्वं स्यात्समनादौ स्यादौ बहुत्वे सति देवेभ्यः ङसिरत् अतः परो ङसिरत् स्यात् दे
वात् देवाभ्यां देवेभ्यः ङस्स्य अतः परो ङस्स्यः स्यात् देवस्य ओसि अत एत्वं स्यादोसि परे देवयोः नुडा
मः समानात्परस्यामो नुडागमः नुडुच्चारणार्थः नामि नामि परे पूर्वदीर्घः स्यात् देवानां अङि ए देवे दे
वयोः किलात्षः सः कृतस्य कवर्गादिलाच्चपरस्याहारात्परस्य केनचित्सूत्रेण कृतस्य सस्य षादेशः स्या
त् देवेषु सिद्धिः आमंत्रणेऽर्थे सिद्धिसंज्ञः स्यात् समानाद्धेर्लोपोधातोः ह्रस्वात्समानादेदो तश्चपर
स्य धेर्लोपः स्यादधातोः आभिमुख्याभिव्यक्तये हेशब्दस्य प्राक्प्रयोगः हे देव हे देवौ हे देवाः एवं
घटपटरामादयोप्यदंताः सर्वादेस्तु विशेषः सर्व विश्व उभ उभय अन्य अन्यतर इतर डतर डतम
कतर कतम सम सिम नेम एक पूर्व पर अवर दक्षिण उत्तर अपर अधर स्व अंतर त्यद् तद् यद् एतद्
अदस् इदम् द्वि किम् युष्मद् अस्मद् एते सर्वादयस्त्रिलिंगाः सर्वः सर्वौ जसी सर्वादेरतः परो जस ४
ई स्यात् सर्वे सर्वं सर्वौ सर्वान् षुर्नो णोऽनंते षकाररेफऋवर्णेभ्यः परस्य नस्य ण आदेशः स्यादंते भिन्नपदे

चष्टितमन्न अव कुघं तरेपि अवप्रत्याहारकवर्गपवर्गैर्मध्ये व्यवधाने पि स्यान्नान्येन सर्वेण सर्वाभ्यां
सर्वैः सर्वादेः स्मट् सर्वादेरदंतात्परस्य ङेङ्त्ये तस्य स्मडागमं सर्वस्मै सर्वाभ्यां सर्वेभ्यः अतः सर्वादेरदंता
त्परस्यातः स्मडागमः सर्वस्मात् सर्वाभ्यां सर्वेभ्यः सर्वस्य सर्वयोः सुडामः सर्वादेरवर्णान्तात्परस्यामः
सुडागमः सर्वेषां ङिस्मिन् सर्वादेरदंतात्परो ङिः स्मिन् स्यात् सर्वस्मिन् सर्वयोः सर्वेषु हे सर्व हे सर्वौ हे
सर्वे एवं विश्वादय एकत्रिंशंताः उतरउतमौ प्रत्ययौ न तस्त दंताग्राह्यौ: पूर्वादीनां नवानां जस्ङसि
ङीनामी स्मात् स्मिनो वा क्रमेण पूर्वे पूर्वाः पूर्वस्मात् पूर्वात् पूर्वस्मिन् २ एवे शेषं सर्ववत् एवं परा-
दयः प्रथमचरमतयाय अल्पार्द्धकतिपयनेमानां जसी वा प्रथमे प्रथमाः शेषं देववत् नेमे नेमाः
शेषं सर्ववत् तयायप्रत्ययौ न तस्त दंताग्राह्यौ: तीयस्य वा ङित्सु सर्ववद्रूपं द्वितीयस्मै द्वितीया-
य द्वितीयस्मात् द्वितीयात् द्वितीयस्मिन् द्वितीये एवं तृतीयः उभशब्दो नित्यं द्विवचनांतः उभौ २
उभाभ्यां ३ उभयोः २ उभयशब्दस्यैकवचनबहुवचने स्तः उभयः उभये उभयं उभयानित्यादि सदं-
तो मासशब्दः मासस्याल्लोपो वा मासशब्दस्याल्लोपो वा स्यात्स्यादौ परे हसेपः सेर्लोपः हसांतादीवंता-
त्परस्य सेर्लोपः स्यात् माः मासौ मासः मासं मासौ मासः मासा सोर्विसर्गः आ दवे लोपश्च माभ्यां मा-
भिः मासे माभ्यां माभ्यः मासः माभ्यां माभ्यः मासः मासोः मासां मासि मासोः मास्सु हे माः हे मासौ हे मा-
सः पदेदेवत् आदंतः सोमपाःशब्दः सोमपाः सोमपौ सोमपाः सोमपां आतो धातोर्लोपः धातुसंबं-
धिन आतो लोपः स्यात्स्यादौ स्वरे सोमपः सोमपा सोमपाभ्यां सोमपाभिः सोमपे सोमपाभ्यां सोमपाभ्यः

प्र०र०
५

सोमपः सोमपाभ्यां सोमपाभ्यः सोमपः सोमपोः सोमपां सोमपि सोमपोः सोमपासु एवं कीलालपामधुपाशं
खध्माप्रभृतिः धातोरिति किं विशेषणात् हाहान् इत्यादौ नातो लोपः इदंतो हरिः शेषः हरिः श्रौयू इदंतादुदं
ताच्चपरऔमृयाति ई ऊ स्तः हरी एओ जसि इदंतस्योदंतस्य च जसि परे एओ च स्यात् हरयः धौ इदंतस्योदंत
स्य च धावेदो च स्यात् हे हरे हे हरी हे हरयः हरिं हरी हरीन् टा ना स्त्रियां इदंतादुदंताच्च परस्य टा ना स्यादस्त्रि
यां हरिणा हरिभ्यां हरिभिः ङिति इदंतस्योदंतस्य च ङिति परे एदो च स्यात् हरये हरिभ्यां हरिभ्यः ङसिङ
सोरस्य एदोद्भ्यां परस्य ङसिङसोरस्य लोपः हरेः हरिभ्यां हरिभ्यः हरेः हर्योः हरीणां ङेरौ ङित् इदुद्भ्यां परस्य ङे
रौ स्यात् ङिच्च ङितेः टेः ङिति परे टेर्लोपः हरौ हर्योः हरिषु एवमग्निगिरिरविकव्यादयः उदंताः विष्णुवायुभा
न्वादयोप्येवं ज्ञेयाः भानुः भानू भानवः भानुं भानू भानून् भानुना भानुभ्यां ३ भानुभिः भानवे भानुभ्यः २ भानोः २
भान्वोः भानूनां भानौ भानुषु हे भानो हे भानू हे भानवः सख्युर्धि शेषः सेर्डा धेः सखिशब्दात्परस्य सेर्धेर्डा स्या
त् सखा हे सखे ऐ सख्युः आ खिशब्दस्यैकारादेशः स्यात्पंचसु परेषु षष्ठीनिर्दिष्टस्यादेशोंतस्य ज्ञेयः स
खायौ द्विवचनस्यावा छंदसि सखाया २ सखायः सखायं सखायौ सखीन् सखिव स्योरीकः सखिपत्यो
रीगागमो टाङे ङिषु परेषु दीर्घत्वा— ना सख्या आगमजं नित्यं सखिना सख्ये ३ ३ ३ सखिपत्योरीगागमो ङ म३
सिङसोरीं परे सख्व् त्र म इति स्थिते ऋतो उ उः ऋदंतात्परस्य ङसिङसोरीस्य उ स्यात् ङिच्च सख्युः २ ङेरौ ङिदि
त्यौकारे कृते सखिपत्योरीकः सख्यौ शेषं हरिवत् पत्या पत्ये पत्युः २ पत्यौ शेषं हरिवत् पतिः समासे।

५

हरिवद्देवस्पतिना भूपतये इत्यादि द्विशब्दो नित्यं द्विवचनांतः त्यदादेष्टेरः स्यादौ त्यदादेष्टेरः स्यात् स्यादौ
द्वौ २ द्वाभ्यां ३ द्वयोः २ त्रिशब्दो बहुवचनांतः एवो जसि त्रयः त्रीन् त्रिभिः त्रिभ्यः २ त्रेरय ३ त्रिशब्दस्य त्रयादेशो
आमि परे डिदंतस्य वक्तव्यः त्रयाणां त्रिषु कतिशब्दो नित्यं बहुवचनांतस्त्रिषु सरूपः कतिशब्दात् जस्शसोर्लु
क् लुकि न तन्निमित्तं कति २ कतिभिः कतिभ्यः २ कतीनां कतिषु ईदंतः सुश्रीशब्दः सुश्रीः य्वोर्धातोरियुवौ
स्वरे धातोरिवर्णोवर्णयोरियुवौ स्तः स्यादौ स्वरे सुश्रियौ सुश्रियः हे सुश्रीः सुश्रियं सुश्रियौ सुश्रियः सुश्रि
या सुश्रीभ्यां सुश्रीभिरित्यादि एवं सुधीशब्दः एवम् ऊदंतः स्वयंभूशब्दः सेनानीशब्दस्य विशेषः सेनानीः य्वोवा
अनेकस्वरस्य नाम्नो धातोरिवर्णोवर्णयोर्यवौ स्तः स्वरे परे धातोरसंयोगः पूर्वो यस्य तु न वा शब्दादृषीभूपुन नत्त १
र्भ्व लिलिरिक्कन्शब्द सुधीशब्दयोर्न सेनान्यौ सेनान्यः सेनान्यमित्यादि सेनान्यादीनां वामो नुड्वक्तव्यः सेना
न्यां सेनानीनां आम्ङेर्नियश्च आवंतान्नीशब्दाच्च परस्य डेरामादेशः स्यात् सेनान्यां सेनान्योः सेनानीषु एवं
ग्रामणीप्रभृतिः ऊदंतो यवलूशब्दः यवल्वौ यवल्वः इत्यादि ऋदंतः पितृशब्दः सेरा ऋदंतात्परस्य सेरा स्यात् डि
च्चसः पिता [illegible] पंचसु ऋदरस्यात्पंचसु स्यादिषु पितरौ पितरः घेरर् ऋदंतात्परस्य घेरर् स्यात् डिच्चसः हे पितः
हे पितरौ हे पितरः पितरं पितरौ पितॄन् पित्रा पितृभ्यां पितृभिः पित्रे पितृभ्यां पितृभ्यः ऋतो डुः पितुः २ पि
त्रोः २ पितॄणां डौ ऋतोरस्यात् डौ परे पितरि पितृषु एवं जामात्रादयः नुर्वा नामि दीर्घः नृणां नॄणां शेषं पितृ
वत् कर्तुर्विशेषः स्तुरार् सकारः तृप्रत्ययस्य संबंधिन ऋत आर् स्यात् पंचसु सेरा कर्ता कर्तारौ कर्तारः कर्तारं क
र्तारौ कर्तॄन् शेषं पितृवत् उद्गातृ ननन्दृ नेष्टृ होतृ सतृ त्वष्टृ योतृ प्रशास्तॄणां च आर् क्रोष्टुशब्दस्य पंचस्व

प्र०म०
६

धिषु तृप्रत्ययांतवद्रूपं क्रोष्टा क्रोष्टारौ क्रोष्टारः हे क्रोष्टो क्रोष्टारं क्रोष्टारौ क्रोष्टून् टादौ स्वरे क्रोष्टुशब्दस्य वा तृ
वद्रूपं क्रोष्ट्रा क्रोष्टुना क्रोष्ट्रे क्रोष्टवे क्रोष्टुः २ क्रोष्टोः २ क्रोष्ट्रोः २ क्रोष्टोः २ कृताकृतप्रसंगी यो विधिः स नित्यः
नित्यानित्ययोर्नित्यो विधिर्बलवान् क्रोष्टूनां क्रोष्टरि क्रोष्टौ क्रोष्टुषु नादेशो भानुवत् ऐकारांतः सुरैशब्दः रैर्हलि
रैशब्दस्याकारादेशः स्याद्धलि विभक्तौ परे सुराः सुरायौ सुरायः सुरायं सुरायौ सुरायः सुराया सुराभ्यां सुराभिः
सुरायै इत्यादि ओदंतो गोशब्दः ओरौ ओत औः स्यात् स्यंवसु गौः गावौ गावः हे गौः आमशसि ओत आत्वं स्यात् इमिश्रा
मिव गां गावौ गाः गवा गोभ्यां गोभिः गवे गोभ्यां गोभ्यः २ गोः २ गवोः २ गवां गवि गोषु एवं सुद्योशब्दः औदंतो ग्लौ
शब्दः ग्लौः ग्लावौ ग्लावः ग्लौभ्यामित्यादि इति स्वरांताः पुल्लिंगाः अथ स्त्रीलिंगाः आदंतो गंगाशब्दः आपः आ
बंतात्सेर्लोपः गंगा औरी आबंतात्परे औ रीः स्यात् गंगे गंगाः धिरिः आबंतात्परो धिः इः स्यात् हे गंगे अंबादीनां
धौ ह्रस्वः हे अंब हे अक्क गंगां गंगाः टौसोरे आबंतस्य टौसोः परत एत्वं स्यात् गंगया गंगाभ्यां गंगाभिः ङितां
यट् आबंतात्परेषां ङे ङसि ङस् ङीनां यडागमः स्यात् गंगायै गंगाभ्यां गंगाभ्यः गंगायाः गंगाभ्यां गंगाभ्यः गंगा
याः गंगयोः २ गंगानां आम्ङेः गंगायां गंगासु एवं श्रद्धामेधाशालामालाप्रभृतिः आबंतः स्त्रियां अदंतान्नाम्नः
स्त्रियां वर्तमानाट्टाप्प्रत्ययः स्यात् सवर्णे दीर्घः सह सर्वा यटोच्च आबंतात्सर्वादेः परस्य यटः सुडागमः पूर्व
स्य चापोऽस्यात् सर्वस्यै सर्वस्याः २ सुडागमः सर्वासां सर्वस्यां शेषं गंगावत् एवं विश्वादयः जरायाः स्वरादौ जर
स वा वक्तव्यः गुरुः शिच्च सर्वस्य वक्तव्यः जरा जरसौ जरसः जरसं जरसौ जरसः जरसा जरसे जरसः २ जर
सोः २ जरसां जरसि पक्षे हसादौ च गंगावत् धौ हे जरे इदंतो बुद्धिशब्दः बुद्धिः औ ई बुद्धी बुद्धयः हे बुद्धे बु

मिदुद्धा

ङें बुद्धौ बुद्धीः स्त्रियां नत्वं बुद्ध्या बुद्धिभ्यां३ बुद्धिभिः इदुद्भ्यां स्त्रियां वर्त्तमानाभ्यां परेषां ङितामडागमो वा बुद्ध्यै
ङिति बुद्धये बुद्धिभ्यां बुद्धिभ्यः२ बुद्ध्याः२ बुद्धेः२ बुद्ध्योः२ बुद्धीनां स्त्रियां योः स्त्रियां वर्त्तमानादिवर्णोवर्णान्तात्
परस्य ङेरामस्यात् बुद्ध्यां अडन्ताविश्रामनाव: बुद्धौ बुद्धिषु एवं मतिभूतिधृतिप्रभृतिः एवं धेनुरज्जुप्रभृत्युदन्ता
एतैरेव सूत्रैः साध्याः धेनुः धेनू धेनवः हे धेनो धेनुं धेनू धेनूः धेन्वा धेनुभ्यां धेनुभिः धेन्वै धेनवे धेनुभ्यां धेनु
भ्यः धेन्वाः२ धेनोः२ धेन्वोः२ धेनूनां धेन्वां धेनौ धेनुषु ईदन्तो नदीशब्दः हसेपः सेर्लोपः नदी नद्यौ नद्यः धो ह्र
स्वः ईदूतौ स्त्र्याख्यौ स्त्रियां धोपरे ह्रस्वः हे नदि हे नद्यौ हे नद्यः नदीं नद्यौ नदीः नद्या नदीभ्यां३ नदीभिः ङि
घा ७ तामट् स्त्रियामीदन्तादूदन्ताच्च ङितामडागमः नद्यै नदीभ्यां२ नदीभ्यः२ नद्याः नद्योः२ नदीनां नद्यां नदीषु
एवं गौरी सरस्वती ब्राह्मणी प्रभृतिः लक्ष्मीशब्दस्यानीवत्त्वात् सिलोपः लक्ष्मीः लक्ष्म्यौ लक्ष्म्यः हे लक्ष्मि
शेषं नदीवत् स्त्रीशब्दस्येवत्वात् सिलोपः स्त्री स्त्रीसुवोः स्त्रीभ्रूशब्दयोः इयुवौ स्तः स्वरपरे स्त्रियौ स्त्रि
यः हे स्त्रि वामशसि अमि शसि च स्त्रियो वा इयादेशः स्यात् स्त्रीं स्त्रियं स्त्रियौ स्त्रियः स्त्रीः स्त्रिया स्त्रीभ्यां३ स्त्रीभिः
धु५ वेयुवः ईवर्णान्तात् ङितामट् स्त्रियास्तु नित्यं स्त्रियै स्त्रियाः२ स्त्रियोः२ नुडेवामि विशेषात् स्त्रीणां स्त्रियां स्त्रि
षु आदेशे नदीवत् श्रीः श्रियौ श्रियः हे श्रीः श्रियं श्रियौ श्रियः श्रिया श्रियैः श्रिये श्रियाः श्रियः२ श्रि
योः श्र्यादीनां वामौ नुड्वा श्रीणां श्रियां श्रियि श्रियां हसादौ स्त्रीवत् एवं धीह्रीप्रभृतिः भ्रूशब्दः
स्त्रीवद्वर्जं ब्वादीनां नदीवद्रूपं वधूः वध्वौ वध्वः हे वधु वधूं वध्वौ वधूः वध्वा वधूभ्यामित्यादि ऋ
दन्तो मातृशब्दः पितृवत् माता मातरौ मातरः धेरर् हे मातः शसि मातॄः स्वसृशब्दः कर्तृवत् स्वसा ॥श्री राम

प्र०म०
७

सारौ स्वसारः आसि स्वसृः स्वसा स्वसृभ्यामित्यादि एकारांतो रैशब्दः रैवत् गोशब्दः एवंवत् नौशब्दः ग्लौवत् इति सुरैशब्द १
स्वरांताः स्त्रीलिंगाः अथनपुंसकलिंगाः अदंतः कुलशब्दः अतोम् अदंता नपुंसकात्परयोः स्यमोरम्स्या
द धो लुग्वा वत्यर्थममो ग्रहणं कुलं हे कुल ईमौ नपुंसकात्परऔ ईत्वं याति कुले जस्शसोः शिः नपुंसकात्प
रयोर्जस्शसोः शिः स्यात् गुरुः शिश्च सर्वस्य वक्तव्यः नुमयमः नपुंसकस्य नुमागमः शौपरे यमप्रत्याहारांतस्य
न मिदंत्यात्स्वरात्परो वाच्यः उदुच्चारणार्थः नोपधायाः नांतस्योपधायाः दीर्घः शौ पुंसि पंचस्वपि षु नामि च कु पा५
लानि पुनरपि कुलं कुले कुलानि शेषं देववत् एवं फलपत्रादयः स्वत्वन्यादे अन्यादेः परयोः स्यमोः स्तुः स्यात्
सस्वरोच्चारणार्थः अन्यत् अन्ये अन्यानि पुनरपि अन्यत् अन्ये अन्यानि एवमन्यतर इतरत् कतरत् कत
मत् शब्दाः शेषं सर्ववत् इदंतः अस्थिशब्दः नपुंसकात्स्यमोर्लुक् स्यात् अस्थि घृणां इदुदृदंतानां नपुंस
के धो वा गुणः हे अस्थे हे अस्थि नामिनः स्वरे नाम्यंतस्य नपुंसकस्य नुमागमः स्यादौ स्वरे अस्थिनी अस्थी
नि २ अस्थ्यास्थ्ना शसादौ अस्थ्यादीनां नुमागमः इतश्चात्स्यात्स्थ्न सादौ स्वरे अल्लोपः स्वरेस्वयुक्ता स्थ्न सादौ
नांतस्योपधाया लोपः शसादौ स्वरे मांत वांत संयोगात्परस्य तु न अस्थ्ना अस्थिभ्यां अस्थिभिः अस्थ्ने अ
स्थिभ्यामित्यादि वेङ्योः ईङ्योः परयोर्वा अतो लोपः अस्थ्नि अस्थनि अस्थ्नोः अस्थिषु एवं दधिस
क्थि अक्षिशब्दाः इदंतो वारिशब्दः वारि वारिणी वारीणि २ वारिणा वारिभ्यां ३ वारिणे वारिभ्यः २ वा
रिणः वारिणोः २ आमि नुडेव वारीणां वारिणि वारिषु हे वारे हे वारि नपुंसकस्य ह्रस्वः स्यात् ग्रामणि ८

कुलं ग्रामणिनी ग्रामणीनि २ टादौ वा ॥ उक्तपुंस्कं पुंवद्वा ॥ उक्तपुंस्कं नाम्यंतं नपुंसकं पुंवद्वा स्यात् टादौ स्व
रे ग्रामण्या ग्रामणिना ग्रामणिभ्यां ग्रामणिभिरित्यादि ग्रामणीनां ग्रामणिनि ग्रामण्यां ग्रामण्योः ग्रामणि
नोः ग्रामणीषु सोमपं कुलं सोमपे सोमपानि २ शेषं देववत् ॥ उदंतो मधुशब्दः ॥ मधु मधुनी मधूनि २ मधुना
मधुभ्यां मधुभिरित्यादि हे मधो हे मधु एवं खलपु खलपुनी खलपूनि २ ॥ ऋदंतः कर्तृशब्दः ॥ कर्तृ कर्तृ
णी कर्तॄणि २ कर्त्रा कर्तृणा कर्तृभ्यामित्यादि हे कर्तृ हे कर्तः ॥ ऐकारांतो रैशब्दः ॥ ह्रस्वादेशे संध्यक्षराणा ति
मिदुतौ वक्तव्यौ ॥ अतिरि अतिरिणी अतिरीणि २ अतिरिणा अतिराया पक्षे हसादौ च वा रिवत् हे अ
तिरि ॥ औदंतो तिनौशब्दः ॥ अतिनु अतिनुनी अतिनूनि २ अतिनुना अतिना वा अतिनुभ्यामित्यादि
हे अतिनु ॥ ओदंतो उपगोशब्दः ॥ उपगु उपगुनी उपगूनि २ शेषं मधुवत् ॥ इति स्वरांता नपुंसकलिंगाः ॥ अथ
हसांताः पुल्लिंगाः ॥ हांतो नडुहशब्दः ॥ अनडुहश्च पंचसु पुंस्यामागमः स्यात् सावनडुहः अनडुहः सो नु
मागमः संयोगांतस्य लोपः स्यादौ रसे पदांते च हसेपः से लोपः अनड्वान् अनड्वाहौ अनड्वाहः धा
वम् अनडुहो धोपरे अमागमः हे अनड्वन् हे अनड्वाहौ हे अनड्वाहः अनड्वाहं अनड्वाहौ अनडुहः
अनडुहा वसां रसे दः ॥ वसु स्रंस ध्वंस अनडुहां दत्वं स्यात् ह्रौ तो रसे परे नाम्नश्च रसे पदांते च अनडुद्भ्यां
अनडुद्भिरित्यादि दांतो गोदुहशब्दः ॥ दादेर्घः ॥ दादेर्धातोर्हस्य घत्वं स्यात् ह्रौ तो रसे नाम्नश्च रसे पदां परे २
ते च गोदुघसि इति स्थिते आदि जवानां झभांतस्य झभा स्ध्वोः धातोरसे नां तस्यादौ वर्त्तमानानां जवा

नांऽन्ताः स्युः सध्वयोर्नाम्नश्च रसे पदांते च वावसाने अवसाने वर्त्तमानानां ऽसानां जबाः स्युश्चपा वा गोधु
क् गोधुग् गोदुहौ गोदुहः हे गोधुक् नादेर्दा देर्घः आदिर्जबानामिति घत्वं ऽवेजबाः गोधुग्भ्यामित्यादि सुपि
खसे चपा ऽसानां क्विलोप्यः स कृतस्येति षत्वं कषसंयोगे क्षः गोधुक्षु हांतो मधुलिह्शब्दः होढः धातोर्हस्य
ढत्वं धातोर्ऽसे नाम्नश्च रसे पदांते च मधुलिड् मधुलिट् मधुलिहौ मधुलिहः हे मधुलिड् २ मधुलिड्भ्या
मित्यादि मधुलिट्सु मित्रद्रुहो भेदः द्रुहादीनां घत्वं ढत्वं वा स्तः मित्रध्रुग् मित्रध्रुक् मित्रध्रुड् मित्र
ध्रुट् मित्रद्रुहौ मित्रद्रुहः मित्रद्रुहा मित्रध्रुग्भ्यां मित्रध्रुड्भ्यामित्यादि खसे चपा ऽसानां मित्रध्रुट्सु मि
त्रध्रुक्षु तत्वमुग् तत्वमुक् तत्वमुड् तत्वमुट् तत्वमुहौ तत्वमुहः तत्वमुहं तत्वमुहौ तत्वमुहः तत्व
मुहा तत्वमुग्भ्यां तत्वमुड्भ्यामित्यादि रांतश्चतुरशब्दो बहुवचनांतः चतुराम्शौ च चतुरस्त्र वृस्या
मागमः पं च सुपरेषु शौ च चत्वारः चतुरः चतुर्भिः चतुर्भ्यः २ रः संख्यायाः रांत संख्यायाः परस्यामो नुडा
गमः स्यात् चतुर्णां चतुर्षु य क चतुर्ष्विति लोपकान्नरस्य विसर्गः पंचस्विति गौणत्वे प्रियाश्चत्वारोय
स्यस प्रियचत्वाः प्रियचत्वारौ प्रियचत्वारः प्रियचत्वारं प्रियचत्वारौ प्रियचतुरः प्रियचतुरा प्रियच
तुर्भ्यां ३ प्रियचतुरे प्रियचतुर्भ्यः २ प्रियचतुरः २ प्रियचतुरोः गौणत्वे नुट् न प्रियचतुरां प्रियचतुर्षु ॥
नांतो राजन्शब्दः नोपधायाः नाम्नो नोलोपश्च धौ नांतस्य नाम्नो नस्य नागमस्य लोप शस्यादयो रसे पदां
ते च राजा राजानौ राजानः हे राजन् राजानं राजानौ अल्लोपः स्वरे ऽस्य लोपः लोपः स्तोभ्युभिः स्युरिति नस्य अः अ

८

ज्ञो ज्ञः राज्ञः राज्ञा राजभ्यां नलोपः शि न विभक्तिकार्ये पंचखिति लोपकात् राजभिः राज्ञे राजभ्यः राज्ञः २
राज्ञोः राज्ञां राज्ञि राजनि एवं यज्वन्नात्मन्प्रभृतिः म्वयुक्ताद् नलोपो न यज्वनः यज्वना यज्वभ्यामित्या
दि श्वन्युवन्मघवन्नामेते पंचसु राजनवत् स्यादेः स्यादेर्वि उत्वं यातिश्चासादौ स्वरे तद्धिते ईयादि इति च शुनः श्वना
श्वभ्यामित्यादि युवन्शब्दस्य वस्य उत्वे कृते दीर्घः यूनः यूना युवभ्यामित्यादि मघवन्शब्दस्य वस्य उत्वे उ ओ म
घोनः मघोना मघवभ्यामित्यादि पथिन्शब्दे नेदः इतोत्पंचसु पंचसु पथ्यादीनामितो त्स्यात् थो न्थ पथ्यादी
नां थस्य नुडागमः पंचसु आसौ पथ्यादीनां टेरात्वं सौ परे पंथाः पंथानौ पंथानः हे पंथाः पंथानं पंथानौ पथः टेः
पथ्यादीनां टेर्लोपः शसादौ स्वरे पथः पथा पथिभ्यामित्यादि एवं मथिन् ऋभुक्षिन्शब्दौ दंडिन्निनेदः इनांशौ
सौ इन्हन्पूषन्नर्यमन् एषां शौ सौ चाघोषे परे उपधाया दीर्घः दंडी दंडिनौ दंडिनः हे दंडिन् दंडिनं दंडिनौ
दंडिनः दंडिना दंडिभ्यामित्यादि ब्रह्महा ब्रह्महणौ ब्रह्महणः हे ब्रह्महन् ब्रह्महणं ब्रह्महणौ हनो घ्नि हंते
हस्य घत्वं स्यान्न परे ञि णि ति च परे समयोगे णत्वं न ब्रह्मघ्नः ब्रह्मघ्ना ब्रह्महभ्यामित्यादि पूषा पूषणौ पूषणः पू
षणं पूषणौ पूष्णः पूष्णा पूषभ्यां पूषभिरित्यादि पूष्णो ङौ इल्लोपो वा पूष्णि पूषणि अर्यमा अर्यमणौ
अर्यमणः अर्यमणं अर्यमणौ अर्यम्णः अर्यम्णा अर्यमभ्यां अर्यमभिरित्यादि संख्याशब्दाः पंचनप्रभृत
यो बहुवचनांताः त्रिषु सरूपाः जस्शसोर्लुक् षांतनांतसंख्यायाः परयोर्जस्शसोर्लुक् स्यात् पंच २ पंच
भिः पंचभ्यः २ आमः षांतनांतसंख्यायाः परस्यामो नुडागमः उपधाया दीर्घः नस्य लोपश्च पंचानां पंचसु एवं

प्र०सू०
१७

सप्तन्नवन्प्रभृतिः अष्टनो डौ अष्टन् शब्दात् जस्शसोर्वा डौ अष्टौ २ अष्ट २ वा सु अष्टन आत्वं वा स्याद्धि वि
भक्तिषु अष्टभिः अष्टाभिः अष्टभ्यः २ अष्टाभ्यः २ अष्टानां अष्टसु अष्टासु मांत इदम् शब्दः इदमो यं पुंसि
इदमः पुंस्य यमस्यात्सौपरे अयं त्यदादेष्टेरित्यत्वं दस्य मः त्यदादीनां दस्य मत्वं स्याद्दौपरे इमौ इमे त्यदादीनां
घेरभावः इमं इमौ इमान् अनटौसोः इदमो नादेशो टौसोः परयोः अनेन हल्याः कृत्वस्य दमः सनयोः पर
योरः स्यात् आभ्यां भिस् भिस् इदमदसोर्भिस भिसेव स्यात् एभिर्बहुत्वे एभिः अस्मै आभ्यां २ एभ्यः २ अ
स्मात् अस्य अनयोः २ एषां अस्मिन् एषु किमस्य कादेशे त्यदादेष्टेरित्यत्वे कृते सर्ववद्रूपं कः कौ के कं कौ कान् इत्या
दि धांतस्य त्वं बुध शब्दः आदिजबानामिति भः वावसाने तत्वं भुत् तत्वं भुद् तत्वं बुधौ तत्वं बुधः हे तत्वं भु
त् २ तत्वं भुद्भ्यां तत्वं भुत्सु जांतः सम्राज् शब्दः छशषराजादेः षः छांतशांतषांतानां राजयजसृजमृजभ्रा
जादेश्च षः स्याद्झलांते फसे परे नाम्नश्चरसे पदांते च षस्य षत्वं ढूषी स्याद्वा डत्वं निषेधार्थः षो डः षस्य डत्वं
धातोर्फसे नाम्नश्चरसे पदांते च सम्राट् सम्राड् सम्राजौ सम्राजः हे सम्राट् २ सम्राड्भ्यामित्यादि एवं वि
राज् भ्राज् एतदः दांतात्यद तद यद एतद इदम् अदस् एतेषां त्यदादेष्टेरित्यत्वे कृते सर्ववद्रूपं तः त्यदादेस्तस्य सत्वं स्यात्सौ
सः स्यो स्ये सः तौ ते यः यौ ये एषः एतौ एते एतदो न्वादेशे द्वितीयाटौस्स्वेनो वा वाच्यः उक्तस्य पुनर्भाषणम
न्वादेशः यथा अनेन व्याकरणमधीतं एनं छंदोध्यापय एतं एनं एतौ एनौ एतान् एनान् एतेन एनेन एतयोः २
एतेषु छांतस्य त्वं प्राछ्शब्दः तत्वं प्राट् तत्वं प्राड् तत्वं त्वं प्राछौ तत्वं प्राछः हे तत्वं प्राट् २ तत्वं प्राछं तत्वं प्रा

छौत त्वष्टाष्टः तत्वष्टाड्भ्यामित्यादि थांतोऽग्निमथशब्दः अग्निमत् अग्निमद् अग्निमथौ अग्निमद्भ्यामि-
५२ त्यादि चांतः प्रत्यच्शब्दः अंचेः पंचैनुमवक्तव्यः प्रत्यन्च् सि इति जाते स्तोः श्चुभिः श्चुरिति नस्य ञः संयोगांतस्य
लोपः चोः कुः चवर्गस्य कवर्गादेशो धातोर्ङसे नाम्नश्च स्वरसे पदांते च प्रत्यङ् प्रत्यञ्चौ प्रत्यञ्चः प्रत्यञ्चं प्रत्यञ्चौ ॥
अंचेर्लोपो दीर्घश्च अंचेरस्य लोपः पूर्वस्य दीर्घश्च शसादौ स्वरे तद्धिते ईपीति च प्रतीचः प्रतीचा प्रत्यग्भ्यामित्यादि
सुपि प्रत्यक्षु तिर्यङ् तिर्यञ्चौ प तिरश्चादयः निपात्यंते शसादौ स्वरे तद्धिते ईपीति च तिरश्चः तिरश्चा तिर्यग्भ्या-
मित्यादि सुपि तिर्यक्षु उदङ् उदञ्चौ प उदीचः उदीचा उदग्भ्यामित्यादि सुपि उदक्षु सम्यङ् सम्यञ्चौ प समीचः
समीचा सम्यग्भ्यामित्यादि सुपि सम्यक्षु सध्र्यङ् सध्र्यञ्चौ प सध्रीचः सध्रीचा सध्र्यग्भ्यामित्यादि सुपि सध्र्यक्षु
तांतो मरुत्शब्दः मरुत् मरुद् मरुतौ हे मरुत् २ मरुद्भ्यां मरुत्सु एवं भिच्छित्प्रभृतयः तांत उदनुबंधो महच्छ- २८
ब्दः उगितो नुम् उदनुबंधस्य ऋदनुबंधस्य च नुमागमः पुंसि पंचसु न्संमहतो धोर्दीर्घः शौ च न्संतस्याप्शब्द-
स्य महतश्च दीर्घः स्यात् पंचस्वघुट्सु शौ च परे महान् महांतौ प हे महन् महतः महता महद्भ्यामित्यादि उद-
नुबंधो भवच्छब्दः अत्वसोः सौ अत्वंतस्यासंतस्य चाधोः सौ दीर्घः स्यात् भवान् भवंतौ भवंतः हे भवन् भव-
त्सु ऋदनुबंधो भवच्छब्दः अस्य नुमागम एव न दीर्घः भवान् भवंतौ भवंतः एवं पचत्शब्दः शांतो विश्श-
ब्दः छशषराजादेरिति षः विट् विड् विशौ विशः इत्यादि षांतः षष्शब्दो बहुवचनांतः षट् षड् षड्भिः ष-
ड्भ्यः २ ष्णाः इति नुट् षोडः इति डत्वं षडुनाम इति जाते ष्टुः डोणः स्यान्नामि परे षण्णां षट्सु क्वचित्पदां-
तेऽपि परं तता वलंव्या षांतो दोषश्शब्दः दोषांः दोषस जुषाशिषह विषप्रभृतीनां षस्य रेफो रसे पदांते च

पु०स०
१०
इसि आंते ३

दोः दोषौ दोषः शसादावनेन ता वा वा च्या। दोष्णः दोषः दोष्णा दोषा दोर्भ्यां दोषभ्यामित्यादि सजुषाशिषो रसेपदां
ते च दीर्घः सजूः सजुषौ सजुषः सजूर्भ्यामित्यादि सांतः पुंस्शब्दः पुंसोसुट् पुंसोसुटा देशः स्यात् स च सुपरेषु टि दंतस्य
वक्तव्यः उत् नुमार्थः पुमस् मि स्थिते नुम् सं महतोर्घो दीर्घः संयोगांत लोपः पुमान् पुमांसौ २ हे पुमन् पुंसः पुंसा पुं
भ्यामित्यादि असंनवेषु पुंसः ककसोऽसंनवेष्वर्थे पुंसः कगागमः सुपि परे स्कोराद्योश्च संयोगाद्योः सकयोर्लोपो धातो
र्से नाम्नश्च रसे पदांते च पुंक्षु अन्यत्र पुंसु एवं विद्वस्शब्दः विद्वान् विद्वांसौ हे विद्वन् वसोर्व उ वसोर्वउत्वं यादि
शसादौ स्वरे तद्धिते ई पि तिच विदुषः विदुषा वसा रसे दः विद्वद्भ्यां विद्वत्सु सुवचसोमा विति दीर्घः सुवचाः सुवचसौ ग त्व सो ६
हे सुवचः ३ सुवचोभ्यामित्यादि एवं चंद्रमस्शब्दः उसनसो नेदः उसनसा उसनस पुरुदंसस नेहसां सेरधेडां स्या
त् उसना उसनसौ उसनसो धौ नाताताः संत नामांत ना वा वा च्या हे उसनन् हे उसन हे उसनः हे उसनसौ हे उसनसः
उसनोभ्यामित्यादि अदसस्यदादेशे स्त्यत्वे सौ सः सो परे अदसो दस्य सः स्यात् सेरौ अदसः सेरौदादेशः असौ
दस्य मः मादू अदसो मात्परयोर्ह्रस्वदीर्घयोः क्रमादुदूतौ स्तः अमू जसी अदुए एरीबहुत्वे बहुत्वे सत्यदस एत ई
स्यात् अमी अमुं अमू अमून् न मुत्वे कृते टानाख्रियां अमुना अद्भि मादू अमूभ्यां ३ अमीभिः अमुष्मै अमी
भ्यः २ अमुष्मात् अमुष्य ओष्यत्वे अयादेशे च कृते मादू अमुयोः २ अमीषां अमुष्मिन् अमीषु सामान्ये दसः
कः स्यादिवच्चः साधारणेर्थे दसः परः कः प्रत्ययः स्यात् तस्यादिवच्चसः असुकः सर्ववत् इति हसांताः पुल्लिंगाः अ
थ स्त्रीलिंगाः हांतउपानहशब्दः नहो धः नहो हस्य धादेशो रसे पदांते च उपानत् उपानद् उपानहौ हे उपानत् उपा
नद्भ्यामित्यादि वांतो दिवशब्दः दिव उ सौ परे दिवो वस्यौ स्यात् द्यौः दिवौ दिवः हे द्यौः वामि दिवो वस्योत्वं वा स्या
द् [illegible] द्यां दिवं दिवौ दिवः दिवा उरसे दिवो वस्योत्वं स्यात् रसे द्युभ्यामित्यादि त्रिचतुरोः स्त्रियां तिसृचतसृ वल

१०

रूपं स्यात् ऋतो ऽ तृवत् अतः सुरारि ति नन्चतस्रः २ चतसृभिः चतसृभ्यः २ न तिसृचतस्रोर्नामि दीर्घः चतसृणां चत

सृषु एवं तिसृशब्दः रांतो गिरशब्दः र्वोर्विहसे धातोरिदुतोर्दीर्घः स्यात् रवयोर्हसपरयोः पदांते च गीः गिरौ गिरः गिरं २

गीर्भ्यामित्यादि एवं पुर धुर इत्यादि धांतः समिधशब्दः समित् समिद् समिधौ हे समित् २ समिद्भ्यामित्यादि भांतः ककु

भ्शब्दः ककुप् ककुब् ककुभौ हे ककुप् २ ककुब्भ्यामित्यादि त्यदादीनां टेरत्वे कृते आवतः स्त्रियां सर्ववद्रूपं स्या।

त्यस्याः सा ते ताः या ये याः एषा एते एताः का के काः इयं स्त्रियां इदमः स्त्रियामियं स्यात् सोपरे इयं इमे इमाः इमां इमे इमाः

अनया आभ्यां ३ आभिः अस्यै आभ्यः २ अस्याः २ अनयोः २ आसां अस्यां आसु चांतस्त्वच्शब्दः चोः कुः वावसाने त्व

क् त्वग् त्वचौ त्वचः एवं ऋच् वाच् प्रभृतिः अपशब्दो बहुवचनांतः सांमहत इति दीर्घः आपः अपः भिदपां अपशब्द

स्य दत्वं स्याद्भिपरे अद्भिः अद्भ्यः २ अपां अप्सु शांतो दिशशब्दः दिशां दिश दृश स्पृश इत्यादीनां स्यादौ रसे पदांते च कु

त्वं स्यात् दिक् दिग् दिशौ हे दिक् २ दिग्भ्यां दिक्षु षांतो त्विषशब्दः षोडः त्विट् त्विड् त्विषौ त्विड्भ्यामित्यादि आ

शीः आशिषौ आशीर्भ्यामित्यादि अदसः सावविशेषः असौ टेरत्वं दस्य मः आवतः स्त्रियां मादू अमू अमूः टेसारे

मादू अमुया अमूभ्यां ३ अमूभिः अमुष्यै अमूभ्यः २ अमुष्याः २ अमुयोः २ अमूषां अमुष्यां अमूषु इति हसांताः स्त्रि

लिंगाः अथ नपुंसकलिंगाः रांतो वारशब्दः नपुंसकात्स्यमोर्लुक् वाः वारी वारि २ वारा वार्भ्यामित्यादि चतुराम्

शौ चेत्याम् चत्वारि २ शेषं पुंवत् नांतो ऽहन्शब्दः अह्नः सः अह्नो नस्य सः स्यात् रसे पदांते च अहः वेङ्योः अह्नी अ।

हनी २ अह्ना अहोभ्यां ३ अहोभिः अह्ने अहोभ्यः २ अह्नः २ अह्नोः २ अह्नां अह्नि अहनि अहस्सु नांतो ब्रह्मन्श

ब्दः ब्रह्म ब्रह्मणी ब्रह्माणि २ ब्रह्मणा ब्रह्मभ्यामित्यादि एवं चर्मन् वर्मन् प्रभृतिः नांता दृदंताच्च छे दसि ङिस्योर्वा।

२०मू० लोपः परमे व्योमन् उपदेशे व्योम्नि सर्वीन्नु तानि छांदसत्वादेव न लोपो दीर्घानिवृत्तिश्च त्यत् त्यद् टेरत्वं त्ये त्यानि २ तत्
११ तद् ते तानि २ यत् यद् ये यानि २ एतत् एतद् एते एतानि २ किं के कानि २ इदं इमे इमानि २ शेषं पुंवत् चोः कुः प्रत्य
क् प्रत्यग् प्रतीची प्रत्यंचि २ जगत् जगद् जगती जगंति २ जगता जगद्भ्यामित्यादि महत् महद् महती महांति २ एवं सांताः पयस् तेजस् प्रभृतयः पयः पयसी पयांसि २ पयसा पयोभ्यां ३ पयोभिः पयसे पयोभ्यः २ पयसः २ पयसोः २ पयसां पयसि पयस्सु तेजः तेजसी तेजांसि २ वचः वचसी वचांसि २ अदसः स्यमोर्लुकि सोर्विसर्गः अदः
टेरत्वम् त्वं च इमो अदुर् एमाद् अमू २ अमूनि २ शेषं पुंवत् इति हसांता नपुंसकलिंगाः अथ युष्मदस्मदो
त्रिषु समौ त्वमहं सिना सिसहितयोर्युष्मदस्मदोस्त्वमहमेतावादेशौ स्तः क्रमेण त्वं अहं युवावौ द्विवचने
युष्मदस्मदोर्द्विवचने युवावौ स्तः आमौ युष्मदस्मद्भ्यां परस्य औ आम् युवां आवां यूयं वयं जसा जसा सहित स्यात्
योर्युष्मदस्मदोर्यूयं वयमेतौ स्तः यूयं वयं त्वमदेकत्वे युष्मदस्मदोस्त्वमदेतावादेशौ स्तः एकत्वे ग
म्यमाने आमस्तौ युष्मदस्मदोष्टेरात्वं स्यादमिसेपरे लक्षिव त्वां मां युवां आवां त्यदाद्यत्वे कृते शसीति
दीर्घः शसो नो वक्तव्यः युष्मान् अस्मान् एटाड्योः युष्मदस्मदोष्टेरेत्वं टाङ्योः परयोः त्वया मया युवाभ्यां
आवाभ्यां ३ युष्माभिः अस्माभिः तुभ्यं मह्यं ङया ङेसहितयोर्युष्मदस्मदोस्तुभ्यं मह्यमेतौ स्तः तुभ्यं मह्यं
भ्यस् भ्यम् युष्मदस्मद्भ्यां परो भ्यस् भ्यम् स्यात् शेषो भादित्वव्यावृत्त्यर्थः तेनात्वे त्वेन युष्मभ्यं अस्मभ्यं
ङसिभ्यसोः अत् तुः पंचम्याः ङसिभ्यसोस्तु स्यात् शित्सर्वादेशः त्वत् मत् युष्मत् अस्मत् तव मम ङसा ङसा ११

सहितयोर्युष्मदस्मदोस्त्वममएतौस्तः तव मम युवयोः आवयोः २ सुडामः सामाकं युष्मदस्मद्भ्यां परः
सामाकं स्यात् युष्माकं अस्माकं त्वयि मयि युष्मासु अस्मासु युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थितेमेवां
नौवस्नसौ युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयासहितयोर्यथासंख्येनामी आदेशाः स्युः तत्रैकवचनेन सह
ते मे द्विवचनेन सह वां नौ बहुवचनेन वस्नसौ त्वामामा अमासहितयोर्युष्मदस्मदोस्त्वामा एतौ स्तः विष्णु-
स्त्वावतु मापीह दत्तात्ते मेप्यसौ गतिं तन्यात्ते मे पि शर्माणि पातु वां नौ स ईश्वरः १ मोदं वां नौ ददात्वाद्यः पति
र्वामपि नो हरिः पायाद्वो नः सुखं वो नो देयात्सेव्यो हि वः स नः २ नादौ वा क्यादौ पादादौ वर्त्तमानयोर्युष्मद
स्मदोर्नैते आदेशाः त्वां पातु मां तु वेदैरशेषैः संवेद्यो ब्रह्मा नः कृष्णः सर्वदावतु संबोधनपदात्परा नैते आ
देशाः हे राम तव दासोस्मि विशेष्यपूर्वादितरपूर्वात्संबोधनपदात्परयोरेतयोरेते आदेशाः स्युः हरे कृ
पालो नः पाहि सर्वदा रक्षि देव नः चादिभिश्च चादियोगेनैते आवयोर्युवयोश्चेशो हरिर्मामेव र
क्षतु चादिर्निपातः च वा ह अह एव एवं नूनं पृथक् नाना विना स्वस्ति दोषा नक्तं मृषा मिथ्या मिथस् अथ
अथो अहो ह्यस् श्वस् उच्चैस् नीचैस् स्वर् अन्तर् पुनर् नयस् आहोस्वित् उत अपि सह कृते अन्तरेण अं प्रातर् १८
तरा नमस् अलं कृतं अमा नो ना प्रति घे धे ईषत् किले खलु वै आरात् दूरात् नृसं सार्धं चिरं मनाक् इत्या
दि स्वराद्यश्च निपाताः स्युः तत्रादिर्गणो विभक्त्यर्थे निपात्यते तस्मिन्निति तत्र अस्मिन्निति अत्र यत्र कुत्र
तेन प्रकारेण तथा कथं इत्थं तस्मादिति ततः कुतः यतः अतः इतः सार्वविभक्तिकस्तसिल्येके आ

प०नू० दितः मध्यतः अंततः उभयतः त्वतः मतः पूर्वस्मिन्निति पुरस्तात् अधस्तात् उपरिष्टात् किमंसामान्ये चिदा- निद्रासाद्य
१२ दिः कश्चित् कश्चन क्वचित् क्वचन तदधीनतकार्त्स्न्येयोर्वास्यात् राजाधीनं राजसात् सर्वं भस्म भस्मसात् सुडी कीह
आहि च दूरे दक्षिणाहि वसंति चांडालाः उर्युरर्यंगीकरणे उरीकृत्य उररीकृत्य मध्य आदिः कालेनिपा तिहे॥ छ॥
मा४ त्यंते सद्य अद्य अद्येइदानीं तस्मिन्काले तदा यदा कदा सपदि सांप्रतं संप्रति झटिति तूर्णं आशु शीघ्रं
पूर्वेद्यु परेद्यु तर्हि यर्हि कर्हि एतर्हि प्रादिरुपसर्गाः प्र परा अप सम् अनु अव निस् निर् दुस् दुर् अभि
वि अधि सु उद् नि प्रति अपि अति परि उप आ उ- आविर् इत्यादि प्रेगधातोः उपसर्गधातोः प्राक्प्रयोक्त
५० व्याः तदव्ययं चादिरव्ययसंज्ञः स्यात् क्त्वायंतं क्त्वाकप् तुमणमञ्चि इत्याद्यंतं चाव्ययसंज्ञं अव्ययाद्वि
भक्ते लुक् न तु आवृन्निर्देशो यथा उच्चैस्त्वांतपः लिंगविभक्ति वचनेषु समं व्ययं च न याति तदव्ययं भागु
रिमते अवाप्योरल्लोपो हसांतानामाप् च अवगाहः वगाहः अपिधानं पिधानं वाचा निशा दिशा अथ
स्त्रीप्रत्ययाः आ वतः स्त्रियां जाया माया मेधा धारा इत्यादि अजादेश्चाप् अजा एडका कोकिला मूढागणि
का अश्वा चटका मूषिका बाला इत्यादि काप्यतः कापि परे पूर्वस्यात इत्स्यात् कारिका पाचिका पाठि
का ह्रस्वो वा कापि तरादौ च परे ह्रस्वो वा वेणिका वेणीका नदिका नदीका श्रेयसितरा श्रेयसीतरा श्रेय
सितमा श्रेयसीतमा वा ग्रहणाद्देवसंध्यन्तराणां न गोका नौका न्वण ईप् नांता दृदंता दणे ताच्च स्त्रियामीप्
स्यात् दंडिनी मघोनी शुनी कर्त्री यस्य लोपः इवर्णो वर्णयोर्लोपः स्यात्तद्धिते स्वरे यकारे ईपि च औपगवी
ऐंद्री ईप्यनो लोपः राज्ञी षितः षकारटकारऋकारानुबंधात् स्त्रियामीप् नर्तकी कुरुचरी गोमती पचंती १२

५-पादोवाईप् द्विपदी द्विपात् ५-५

नद्यादेः स्त्रियामीप् नदी गौरी गोतमी सौपर्णेयी आह्निकी इत्यादि इंद्रादेरानीप् इंद्राणी भवानी वरुणा
नी सर्वाणी इत्यादि मातुलोपाध्यायक्षत्रियाचार्याद्वा मातुलानी मातुली उपाध्यायानी उपाध्यायी क्ष
त्रियाणी। क्षत्रिया आचार्याद्णत्वं आचार्यानी आचार्या हिमारण्ययोर्महत्वे महद्धिमं हिमानी महद
रण्यं अरण्यानी यवनाल्लिप्यां यवनानां लिपि यवनानी ईः समाहारे गुणश्च त्रयाणां समाहारस्त्रयी पुंयो
गे वा ईप् मृडस्य स्त्री मृडी गणकस्य स्त्री गणकी जातेरयोपधात् जातिवाचिनो योपधाद्दंतात् स्त्रियामी २
प् स्यात् महिषी हंसी ब्राह्मणी योपधात्तु क्षत्रिया वैश्या प्रथमवयोवाचिनो नईप् वाच्य कुमारी किशोरी
प्रथमवयग्रहणात् वृद्धा अकूहणात् शिशुः स्वांगाद्वा स्वांगवाचिनो वा स्त्रियामीप् सुमुखी सुमुखा सुके
शी सुकेशा वाग्रहणादेव पक्षे स्ववदना इत्यादौ न कृदिकारादक्तेरीप् वा अंगुली अंगुलिः धूलिः धूली
अक्त इति विशेषणात् स्मृतिः कृतिः ऐवमन्वादेः मन्वादेर्गणात् स्त्रियामी स्यादैदादेश्च वा मनोरौ वा
मनावी मनायी वृषाकपायी अग्नायी पत्न्यादयो निपात्याः पत्नी सपत्नी सखी अशिश्वी जरती प्राची प्रतीची इ
त्यादि क्वचिद्वा निपातादीप् दृढपतिः दृढपत्नी वृषलपतिः वृषलत्नी इत्यादि दारशब्दो बहुवचनां
तः पुल्लिंगः दाराः दारान् दारैः दारेभ्यः२ दाराणां दारेषु वोर्गुणात् उदंताद्गुणवाचिनो वा स्त्रियामी
प् पट्वी पटुः मृद्वी मृदुः उतरू उदंतादूप्रत्ययः पंगूः वामोरूः यूनस्तिः युवन्शब्दात् स्त्रियां तिप्र
त्ययः युवतिः अथ विभक्त्यर्थाः लिंगार्थे प्रथमा नामार्थमात्रे प्रथमा स्यात् नियतोपस्थितिको नाम।

प्र०म० र्थः कृष्णः श्रीः ज्ञानं गौरी दृष्टाः आदिकं आमंत्रणे च अभिमुखीकरणे च प्रथमा हे देव हे देवौ हे देवाः भवद्भग
१३ वद्दयवतां नोस्तु नंघोस्तु अघोस्तु एते निपात्याधो नोहरे नगोनमस्ते अघोयाहि शेषाः कार्यकर्तृसाधनयोर्दानपा
त्रविश्लेषावधी संबंध आधारनावयोः द्वितीयाद्याः सप्तार्थेषु स्युः कर्यं कर्मकारके द्वितीया स्यात् तच्चतुर्विधं उत्पा
द्यमाप्यं संस्कार्यं विकार्यं च कटं करोति कारुः को रूपं पश्यति चाक्षुषः राज्यं प्राप्नोति धर्मिष्ठः सोमं सुनोति सोम
पाः १ कर्तरि करणे च तृतीया छिन्नः शरेण रामेण रावणः दानपात्रे संप्रदानकारके चतुर्थी वेदविदे गां दद्या
ति विश्लेषावधौ पंचमी विश्लेषो विनाशस्तस्यावधौ अपादानकारके पंचमी हिमवतो न तरति गंगा धावतो
श्वात्पतति संबंधे षष्ठी राज्ञः पुरुषः आधारे सप्तमी औपश्लेषिकः सामीपिको नि व्यापको वैषयिको नैमित्तिक मी
औपचारिकश्चेति षोढासः कटे शेते कुमारः सो वटे गावः सुशेरते तिलेषु विद्यते तैलं हृदि ब्रह्मामृतं परं यु
द्धे संनह्यते धीरो अंगुल्यग्रे करिणां शतं १ क्रियालक्षणे भावे स्त्रत्रापि सप्तमी वर्षति देवे चोर आयातः गोषु
दुह्यमानासु गतः विनासहनमस्कृते निर्द्धारणस्वाम्यादिभिश्चरातेरपि योगे द्वितीयाद्याः स्युः विनादियोगे
याप द्वितीं विनापापं सर्वं फलति अंतरेण हरिणा किं जीवितेन अंतरा त्वां मां हरिः अभितो ग्रामं नदी वहति सर्व
तो ग्रामं वनं धिग्जाल्मं उपर्युपरि पर्वतो हृदाः अध्यधि सुखं दुःखं एवमनुनयतः परितः समया निकषा
प्रतियोगेपि कालाध्वनोर्नैरंतर्ये मासमधीते क्रोशं पर्वतः सहार्थयोगे तृतीया सह शिष्येणागतो गुरुः
एवं साकं सार्द्धं समं योगेपि येनांगविकारः येनांगेन विकृतेनांगिनो ग विकारो लक्ष्यते ततस्तृतीया अक्ष्णा का
णः कचित्प्रकारप्राप्तस्य लक्षणेपि जटाभिस्तापसः तुल्यार्थयोगेपि कृष्णेन तुल्यः रामेण सदृशः नमः आदि १३

योगे चतुर्थी नमो नारायणाय स्वस्ति राज्ञे सोमाय स्वाहा पितृभ्यः स्वधा एवमलं वषट्योगेपि क्रुद्धाद्यर्थयो
गेपि क्रूराय क्रुध्यति मित्राय द्रुह्यति गुणवते असूयते ऋते आदियोगे पंचमी ऋते ज्ञानान्न मुक्तिः अन्यो
गृहाद्विहारः आराद्वनात् इतरो रामात् ब्राह्मणाः प्रजाः प्रजायंते आङादियोगेपि आमुक्तेः संसारः हेतौ तृ
तीयापंचम्यौ जाड्यात् जाड्येन बद्धः क्रियागुणजातिसंज्ञाभिः समूहात् पृथक्करणं निर्द्धारणं यतस्त
तः षष्ठीसप्तम्यौ क्रियापराणां क्रियापरेषु वा नरावदाराधकः श्रेष्ठः गवां गोषु वा कृष्णा बहुक्षीरा नृणां
नृषु वा ब्राह्मणः श्रेष्ठः छात्राणां छात्रेषु वा मैत्रः पटुः स्वाम्यादियोगे षष्ठीसप्तम्यौ गवां गोषु वा स्वामीप
तिरीश्वरः दायादो वा अनादराधिक्ये क्रियालक्षणे षष्ठी ~~कर्तरि कार्ये च षष्ठी~~ सप्तम्यौ रुदति रुद
तो वा प्राव्राजीत् कर्तृकार्ययोरक्तादौ कृति षष्ठी कर्तरि कार्ये च षष्ठी क्तादिवर्जिते कृति प्रयुज्यमाने
सति कृष्णस्य कृतिः जगतः कर्त्ता कृष्णः स्मृतौ च कार्ये षष्ठी वा द्वितीया मातुः स्मरति मातरं स्मरति
भयहेतौ पंचमी चौराद्बिभेति षष्ठी हेतुप्रयोगे कस्य हेतोः स्थितं कन्या इत्थंभावे तृतीया शिष्यं पुत्रेण
पश्यति तादर्थ्ये चतुर्थी संयमाय श्रुतं धत्ते नरो धर्माय संयमं धर्मो मोक्षाय मेधावी धनं दानाय मुक्त
ये १ क्त्वालोपे कर्मण्याधारे च पंचमी हर्म्यात् प्रेक्षते हर्म्यमारुह्येत्यर्थः निमित्तात् कर्मयोगे सप्तमी चर्मणि
द्वीपिनं हंति दंतयोर्हंति कुंजरं अप्रयोक्ते प्रथमा आख्यातकृत्समासतद्धितोक्ते कारके संबंधे च प्रथमा
स्यात् आख्यातेन यथा क्रियते हरिः करोति कृता कृष्णः कंसं हतवान् कृष्णेन कंसो हतः पचनोऽग्निः
दानीयो विप्र उपाध्यायः पचनी स्थाली समासेन प्राप्तानंदः ऊढरथः पीतांबरः तद्धितेन कौंकुमं मांशु

प्र०न्र० १४

रः छंदसि स्यादिः सर्वत्र स्याद्यर्थेषु स्यादयः स्युः दध्ना जुहोतीति वज्रतीर्विरेतुः इति विभक्त्यर्थाः अथ समासः समासश्चान्वये नाम्नां नाम्नामन्वये सति समासः स्यात् वा स्कृत्तद्धितधातुसंज्ञाप्रयोजकप्रत्ययाश्चपि स षड्विधः पूर्वपदार्थप्रधानो व्ययीभावः द्विगुतत्पुरुषोपरपदार्थप्रधानौ द्वंद्वकर्मधारयावुभयपदार्थप्रधानौ बहुव्रीहिरन्यपदार्थप्रधानः द्वयोर्बहूनां वा पदानामेकपद्यं समासः स्त्रियमधिकृत्येति विग्रहे सति कृते समासे अव्ययस्य पूर्वनिपातः पूर्वेव्ययेव्ययीभावः अव्यये पूर्वपदे सति योन्वयः सोव्ययीभावसंज्ञः समासः समासप्रत्यययोः समासे वर्त्तमानाया विभक्तेः प्रत्यये च परे लुक् अधिस्त्रीति जाते स नपुंसकं सोव्ययीभावो नपुंसकं स्यात् नपुंसकस्येति ह्रस्वत्वं नामत्वात्स्यादि अव्ययीभावात् विभक्तेर्लुक् अधिस्त्रिगृहकार्यं हरिशब्दस्य प्रकाशाद् इति हरि विष्णोः पश्चादनुविष्णु सुराः यथासादृश्ये यथाश्च दृ असादृश्ये समस्यते शक्तिमनतिक्रम्य यथाशक्ति सादृश्ये तु यथा हरिस्तथा गुरुः अतोमनतः अदंतादव्ययीभावाद्विभक्तेर्न लुक् किंतु अतं विना अमादेशः कुंभस्य समीपे कुंभं पश्य वा टाङ्योः अदंतादव्ययीभावाट्टाङ्योरम्वा उप उपकुंभेन कृतं उपकुंभं कृतं उपकुंभं देहि उपकुंभादानय उपकुंभं देशः उपकुंभे निधेहि उपकुंभं निधेहि अवधारणार्थे यावति च अवधारणार्थे यावच्छब्दे प्रयुज्यमाने योन्वयः सोव्ययीभावसंज्ञः यावंति अमत्राणि तावतो ब्राह्मणानामंत्रयस्वेति यावदमत्रं मक्षिकाणामभावो निर्मक्षिकं मधुरूपस्य योग्यं अनुरूपं इत्यव्ययीभावः अमादौ तत्पुरुषः द्वितीयाद्यंते पूर्वपदे सति योन्वयः स तत्पुरुषसंज्ञः समासः ग्रामं प्राप्तो ग्रामप्राप्तः दात्रेण छिन्नं दात्रछिन्नं यूपाय दारुः यूपदारुः वृकेभ्यो भयं वृकभयं राज्ञः पुरुषः राजपुरुषः देवानां पूजकः देवपूजकः अक्षेषु शौंडः अक्षशौंडः क्वचिदमाद्यंतस्य परत्वं गयमतिक्रांतोतिरः नाव

१४

मतिक्रांतो तिनौ अग्नौ आहितः आहिताग्निः पूर्वंभूतः भूतपूर्वः समासे क्वचिदेकपदग्रहणे स्वहेतुः शरा
णां वनं शरवणं आम्राणां वनं आम्रवणं क्वचित् षष्ठी न समस्यते नृणां द्विजः सतां षष्ठः नञि नञिपूर्वपदे
योन्वयः सोपि तत्पुरुषः नाम समासे नञ् अ आदेशः न ब्राह्मणो ऽब्राह्मणः धर्मविरुद्धो ऽधर्मः संज्ञा यस्या नावोसं
ज्ञापः अनस्वरे समासे नञो नादेशः स्वे प्रसादस्यो ऽनश्वः न ईश्वरः अनीश्वरः तदन्यत त्रिरुद्ध तदनावेषु नञ्
इति तत्पुरुषः चार्थे द्वंद्वः समुच्चयान्वयाचयेतरेतरयोगसमाहाराश्चार्थाः तत्रेश्वरं गुरुं च भजस्वेति प्रत्ये
कमेकक्रियासंबंधः समुच्चयः वटो भिक्षामट गां चानयेति क्रमेण क्रियाद्वयसंबंधोन्वाचयः मिलितयो
रेकत्रान्वय इतरेतरयोगः संहतिः समाहारः तत्राद्ययोर्न संभवत्यन्वयात् द्वंद्वे ल्पस्वरप्रधानेदुदंता म।
नां पूर्वनिपातः धवश्च खदिरश्च इतरेतरयोगे द्विवचनं उक्तार्थानामप्रयोगः धवखदिरौ मो त्काचवेमो
गपश्च नोक्तेनोग्यो अग्निश्च मरुच्च अग्निमरुतौ पटुश्च गुप्तश्च पटुगुप्तौ देवताद्वंद्वे पूर्वपदस्यात्वं इदु
श्च बृहस्पतिश्च इंद्राबृहस्पती अग्निश्च विष्णुश्च अग्नाविष्णू क्वचिन्न अग्निवायू ईदग्नेः सोमवरुणयोः
अग्नादेः सोमादीनां सस्य षत्वं अग्नीषोमौ अग्नीवरुणौ समाहारे एकवद्भावः एकत्वे द्विगुद्वंद्वौ नपुं
सकौ स्तः पाणी च पादौ च अनयोः समाहारः पाणिपादं शशाश्च कुशाश्च पलाशाश्च शशकुशपलाशं
अन्यादीनां विभक्तिलोपे पूर्वस्य सगागमो वाच्यः अन्यश्च अन्यश्च अन्योन्यं परस्परं इति द्वंद्वः संख्यापू
र्वो द्विगुः संख्यापूर्वपदे योन्वयः स द्विगुसमासः ऽसमाहारेत ईप् द्विगुः समाहारेर्थे द्विगुः समासो ऽदंता
दीप्स्यात् दशानां ग्रामाणां समाहारो दशग्रामी यस्य लोपः पंचाग्नि पंचानां गवां समाहारः पंचगुः क्वचिन्नप

प्र० न्ह० पंचपात्रं चतुर्युगं त्रिफलेति रूढिः बहुव्रीहिरन्यार्थे अन्यपदार्थे योऽन्वयः स हि बहुव्रीहिसंज्ञः बहुधनं यस्य स
१५ बहुधनः अस्ति धनं यस्य सोऽस्तिधनः बहुव्रीहौ विशेषणसप्तम्यंतयोः पूर्वनिपातः लंबौ कर्णौ यस्य स लंबकर्णः कंठेका
लः क्वचिन्न पूर्वनिपातः इंदुः शेखरे यस्य स इंदुशेखरः पद्मनाभः कपिध्वजः इत्यादि नञ्दुःसुभ्यः प्रजामेधयोरसुक
न प्रजा यस्य सोऽप्रजाः सुप्रजाः दुर्मेधाः धर्मादन् सुधर्मा रूपवती भार्या यस्येति विग्रहे अन्यार्थे स्त्रीप्रत्ययांतस्यान्या
र्थे वर्त्तमानस्य ह्रस्वः स्यात् पुंवद्भा समासे सति समानाधिकरणे स्त्रीलिंगे परे पूर्वस्य स्त्रीलिंगस्य पुंवद्भा स्यात् तन्न ईवापो वै
र्निवृत्तिः रूपवद्भार्यः वाशब्दात् कल्याणीप्रियः इत्यादेर्न गोः गोशब्दस्यान्यार्थे वर्त्तमानस्य ह्रस्वः पंच गावो यस्य स पंच
गुः संख्यासुव्याघ्रादिपूर्वस्य पादशब्दस्य लोपो वाच्यः सहस्रं पादा यस्य स सहस्रपात् सुष्ठु शोभनौ पादौ यस्य सः सुपात्
माघ्रस्य पादाविव पादौ यस्य स व्याघ्रपात् ग्रामादिपूर्वे ईपि च पदादेशः सहस्रपदी द्विपदी इत्यादि टाउकाः स
मासे सति टऋउक इत्येते प्रत्ययाः स्युः यथाप्रयोगमनुसंधेयं अचिंत्यो महिमा यस्यासौ ऽचिंत्यमहिमः अत्राप्र
त्ययः नो वा नांतस्याल्लोपः स्वरे यकारे च वाशब्दात् क्वचिन्न क्वचिदुपधालोपः अह्नो मध्यं मध्याह्नः कवीनां राजा
कविराजः अत्र टप्रत्ययः कविराजी रामः सखा यस्य स रामसखः अत्र टः राज्ञां पूः राजपूः वा कच्चमनड्वाश्वानसंद
क्षिणस्यां दिशि पंथा दक्षिणापथः अहश्च रात्रिश्च अहोरात्रः द्वौ च त्रयश्च द्वित्राः पंच वा षट् वा पंचषाः बहवो राजा
नो यस्यां सा बहुराजा नगरी बहवः कर्त्तारो यस्य स बहुकर्तृकः प्रासादः कर्मधारयस्तुल्यार्थे पदद्वये एकार्थनिष्ठे स
ति कर्मधारयः समासः नीलं च तदुत्पलं च नीलोत्पलं रक्ता चासौ लता च रक्तलता पुंसः खेपि संयोगांतलोपो न पु
मांश्चासौ कोकिलश्च पुंस्कोकिलः नाम्नश्च कृता समासः प्रादेरुपसर्गस्य नाम्नश्च कृदंतेन स तत्पुरुषः प्रकर्षेण वा हर २
दः प्रवादः कुंभकारः महादेः मादिः समासे सति महादीनां सादिरादेशः पुत्रेण सह वर्त्तमानः सपुत्रः सहसंतिरषाषधि
१५

समितिरयः सहांचलितिसध्रङ् सम्यगंचलितिसम्यङ् तिर्यंचलितितिर्यङ् कुत्सितेकुशब्दस्यकत् कुत्सितमन्नंकदन्नं ईष
दर्थेकाकवाईषदुष्णंकोष्णंकवोष्णं पुरुषेवाकाकुत्सितःकापुरुषः कुपुरुषः षट्चदशाचषोडशाः षस्योत्वंद
धाईढौ दंतस्यदतृ षट्प्रकाराअस्यषोढा षट्दंताअस्यषोडन् महांश्चासौईश्वरश्चमहेश्वरः द्यौश्चभूमिश्च
द्यावाभूमी जायाचपतिश्चजंपती दयिताचपतिश्चदंपती आकृतिगणोयं अलुक् क्वचित् क्वचित्समासकृ
त्तद्धितेषुविभक्तेरलुक्स्यात् स्तोकान्मुक्तः अप्सुयोनिः हृदिस्पृक् कंठेकालवाचोयुक्तिः पश्यतोहरः इत्यादि
समानाधिकरणेशाकपार्थिवादीनांमध्यपदस्यलोपोवक्तव्यः शाकप्रियःपार्थिवः शाकपार्थिवः देवपूजको
ब्राह्मणोदेवब्राह्मणः आदेश्चद्वंद्वे द्वंद्वसमासे आदिपदस्यलोपः माताचपिताचपितरौ श्वश्रूश्चश्वशुरश्च
श्वशुरौ ऋतांद्वंद्वे ऋदंतानांद्वंद्वे पूर्वस्यादा मातापितरौ दुहितापुत्रौ द्वंद्वेसर्वादित्वंन पूर्वापरावराणांजसि
वा वर्णाश्रमेतरे वर्णाश्रमेतराः रात्राह्नाहांताः पुंस्येव अहोरात्रः पूर्वरात्रः पूर्वाह्णः द्व्यहः संख्यापूर्वंरात्रंक्लीवं
द्विरात्रं त्रिरात्रं अधिकरणेबहुव्रीहौमध्यपदलोपोवाच्यः कुमुदस्यगंधइवगंधोयस्यसकुमुदगंधिः गंधादेरिः
यस्यलोपः दिक्संख्येसंज्ञायां द्विवाचिसंख्यावाचिशब्दौसमानाधिकरणेनसंज्ञायामेवसमस्येते सकर्मधार
यः दक्षिणाग्निः सप्तर्षयः इतिसमासाः अथतद्धिताः अपत्येण नाम्नोपत्यार्थे अणप्रत्ययःस्यात् आदिस्वरस्य
ति३ णिवृद्धिः स्वराणांमध्येयआदिस्वरस्तस्यवृद्धिर्णितितिवतद्धिते वोव्यस्वरे उवर्णस्योतश्चाव्स्यात् यकारेस्व ति३
रेच उपगोरपत्यमौपगवः वैदुषः वाशिष्ठः भार्गवः गौतमः ऋउरणि मातृशब्दस्यऋतउरस्यादणिपरे षण्णांमातृ
णामपत्यंषाण्मातुरः क्वचिन्नवस्यापिनित्यंनमाः द्वैमातुरः शिवादेश्चाण् शैवः गांगः अतइञ्दक्षः अदंतानां

प्र०५०
१६

म्योन मिश्रादिन्नस्मादपत्येर्थे यस्य लोपः देवदत्तस्यापत्यं देवदत्तिः दाशरथिः औधशिः बह्वादिभ्य बाहोरत्यं बा
हविः गार्गिः नाडिः एयायनणायणीयाः गर्गनडात्रिभ्योपि तृष्वसादेः गर्गादेर्यञ्नडादेरायनण् अत्र्यादेः ढ्रीप्रत्य
यान्ता चणयणपितृष्वसादेरीयायत्यर्थे गार्ग्यः वात्स्यः माण्डूक्यः नाडायनः चारायणः गार्ग्यायणः वात्स्यायनः
आत्रेयः कापेयः माहेयः गांगेयः पितृष्वसुरपत्यं पैतृष्वस्रीयः मातृष्वस्रीयः लुग्बहुत्वे क्वचित् प्रत्ययस्य गर्गाः
वशिष्ठाः भृगवः अत्रयः देवतेदमर्थे देवतार्थेइदमर्थे चोक्ता वक्ष्यमाणाश्च प्रत्ययाः स्युः इन्द्रो देवतास्य ऐन्द्रं हविः
सौम्यं आग्नेयं अग्नीषोमीयं देवदत्तस्येदं देवदत्तं वस्त्रं क्वचिद्द्वयोः पूर्वोत्तरपदाद्ययोः स्वरयोः क्वचिद्वृद्धिर्णिति
आग्निमारुतं णितो वा उक्ता वक्ष्यमाणाश्च प्रत्ययाः णितो वा अजगोरिदं आजगवं अजगवं वा धनुः श्वशुर
स्यायं श्वाशुर्यः श्वशुर्यः विष्णोरिदं वैष्णवं गोरिदं गव्यं कुल्यं तदीयं अस्मदः क अस्मदीयं पितुर्भ्रातरि व्यः
पितुर्भ्राता पितृव्यः मातुर्भ्रातरि डुलः मातुर्भ्राता मातुलः कारकात् क्रियायुक्ते कारकादप्येते प्रत्ययाः
क्रियायुक्ते कर्तरि कर्मणि च कुंकुमेन रक्तं कौंकुमं वस्त्रेण परिवृतो रथ्यः द्वीपे भवः द्वैपः मथुराया आगतो वास्त्रो ७
माथुरः ग्रामे भवो ग्राम्यः धुरं वहतीति धुर्यः धौरेयः मनोर्जातावपत्ये ष्यषणौ मनोर्जातिरपत्यं मनुष्यः मानुषः जातो
किंमानवः केनेयिकाः कारकात्क ईन इय इक इत्येते प्रत्ययाः स्युः कर्तरि कर्मणि चोक्त वक्ष्यमाणेष्वर्थेषु तेष्वणि
तो वा कर्णाटे भवः कार्णाटकः कर्णाटको वा ग्रामादागतस्तत्र जातो वा ग्रामीणः सध्रीचीनः समीचीनः ति
रश्चीनः कुले भवः कुलीनः क्वचिद्यलोपश्च कन्यायां भवः कानीनः पुष्येण युक्ता पौर्णमासी पौषी क्षत्रस्या
पत्यं क्षत्रियः शुक्रो देवतास्य शुक्रियं इदं हविः अक्षै दीव्यति आक्षिकः हलेन वहति हालिकः शब्दं करोति शा
ब्दिकः तर्के चतुरस्तार्किकः वैदिकः अव्ययसर्वादेष्टेः प्रागकः उच्चकैः नीचकैः सर्वकः उभकौ त्वकं अहकं त्पतनो १६

नवाद्यर्थे त्यप्त्नौ प्रत्ययौ स्तः कुत्र भवः कुत्रत्यः कुतस्त्यः तत्रत्यः अद्यतनः श्वस्तनः सुदातनः स्वार्थेपि उक्ता वक्ष्यमाणा
श्च प्रत्ययाः स्वार्थेपि स्युः देवदत्त एव देवदत्तकः चत्वार एव वर्णाश्चातुर्वर्ण्यं चोर एव चौरः भागरूपनामधेयः भाग एव भाग
धेयः रूपधेयः नामधेयः देवात्तः देव एव देवता मृदस्तिकः मृदेव मृत्तिका अणि नयोर्युष्मदस्मदोर्युष्माकास्माकौ एकार्थे
योस्तवकममकौ स्तः युवयोर्युष्माकं वा अयं यौष्माकः यौष्माकीनः आवयोरस्माकं वायं आस्माकः आस्माकीनः तवायं ता
वकः तावकीनः ममायं मामकः मामकीनः व तुल्ये सादृश्यार्थे वत्प्रत्ययः चंद्रेण तुल्यं चंद्रवन्मुखं घटवत् अर्हेपि विधिमर्हति वि
धिवत् भावे त्वयणः शब्दस्य प्रवृत्तिनिमित्तं भावस्तत्र वाच्ये एते स्युः तान्तं स्त्रियां त्वान्तं क्लीवे ब्राह्मणस्य भावो ब्राह्मणत्वं ब्राह्म
णता ब्राह्मण्यं शुक्लत्वं वैदुष्यं समाहारेता च त्रैगुण्यं त्रेता जनता कर्मण्यपि यण्वा स्युः राज्ञ इदं कर्म वा राज्यं राजन्यं भावे टि
लोपः भावेण्यपि लघोर्भावो लाघवं गौरवं यौवनं शैशवं मौनं सौहार्दं लोहितादेर्डिमन् लोहितादेर्भावोडिमन् डि
त्वस लोहितस्य भावो लोहिमा लघिमा कृर इमनि कृतेरः स्यादि मनि प्रथिमा वहोर्लोपो भू च वहोः वहोपरस्या
मिमना ईनामिवर्णस्य लोपो वहोर्भूरादेशश्च वहोर्भावो भूमा समूहेर्थेपि उक्ताः प्रत्ययाः स्युः मयूराणां समूहो
मायूरं कैदारिकं गाणिक्यं हास्तिकं अस्त्यर्थे मतुः नाम्नो अस्त्यर्थे मतुप्रत्ययः स्यात् गावः संत्यस्मिन् अस्य वा गोमान्
गोमती श्रीरस्यास्य श्रीमान् श्रीमती अइकौ मत्वर्थे नाम्न अस्मादिक स्वदंतात् वैजयंती विद्यते अस्य वैजयंतः मायि
कः दंडिकः धनिकः मांतोपधाद्वत्विनौ मांतात् मोपधात् वर्णांतात् वर्णोपधाच्च वतुः हिंस्वदंतात् अस्त्यर्थे भगोस्यास्ति
तिभगवान् धनवान् पुत्रवान् विद्यावान् यशस्वान् भास्वान् लक्ष्मीवान् धनी दंडी छत्री दृषद्वती भूमिः किंवानरा

तद्धितयस्व
रयोः पुंवत्
हस्तिनीनां
समूहो ४

भ्यो २

प्र०म० मी यवादेर्न यवमान् ऊर्मिमान् तडितादित्यस्य वलिनो तडित्वान् अपदांतत्वान्न जवत्वं विद्युत्वान् मरुत्वान् भा
१० यी एतत्किंयत्तद्भ्यः परिमाणे वतुः यत्तदेतदामावतो यत्परिमाणमस्य यावान् तावान् एतावान् किमः किरिदमश्च
यश्च वतोर्वस्य कियान् इयान् तुंदादेरिलः तुंदिलः उदरिलः औन्नत्ये दंतादुरः दंतुरः श्रद्धादेर्लुः श्रद्धालुः कृपालुः द
यालुः अस्मायामेधास्रग्भ्यः स्वार्थे विनिर्वाच्यः तपस्वी मायावी मेधावी स्रग्वी वाचो ग्मिनिः वाग्मी गव्यवधाना
न्नमत्वे धारादेर्लः धारालः दंष्ट्रालः जिह्वालः आलाटौ कुत्सितभाषिणि वाचालः वाचाटः ईषदपरिसमाप्तौ क
ल्पदेश्यदेशीयाः ईषदसमाप्तः सर्वज्ञः सर्वज्ञकल्पः पटुदेश्यः पटुदेशीयः प्रकारे जातीयः पटोः प्रकारः पटुजाती
यः प्रशंसायां रूपः प्रशस्तो वैयाकरणो वैयाकरणरूपः कुत्सायां पाशः कुत्सितो भिषक् भिषक्पाशः भूतपूर्वे च
रट् पूर्वं दृष्टो दृष्टचरः दृष्टचरी प्राचुर्ये विकारप्राधान्यादिषु मयट् अन्नं प्रचुरं यस्मिन् अन्नमयं यज्ञः मृदो विका
रो मृन्मयो घटः स्त्रीप्रधानं यस्य स्त्रीमयो जाल्मः अमृतं स्वरूपं यस्य अमृतमयश्चंद्रः तदधीते वेद वेत्त्यत्राणवत्कव्यः
न संधिय्वोर्युट् संधिजयोर्य्वयोः संबंधिनः स्वरस्य न वृद्धिः किंतु तयोर्युडागमः वर्णान् विश्लिष्य यस्य इट्वस्य
युट्पश्चाद्वृद्धिः व्याकरणमधीते वेद वा वैयाकरणः स्वश्वं वेद सौवश्वः सुधात्रादेरकिञपत्यार्थे सुधातुरपत्यं
सौधातकिः व्यासस्यापत्यं वैयासकिः इतो जातार्थे लज्जा जातास्य लज्जितः फलितः कुटीशमीशुंडाभ्यो रो ह्रस्व
त्वेर्थे ह्रस्वा कुटी कुटीरः शमीरः शुंडारः देवतांतात्तादर्थ्ये यः अग्निर्देवतायै इदं अग्निदैवत्यं पादार्घ्याभ्यां च
पादार्थमुदकं पाद्यं अर्घ्यं तरतमेयस्विष्ठाः प्रकर्षे अतिशयेर्थे तरतमईयसुइष्ठ इत्येते स्युः अतिशयेन शुक्लः शुक्ल
तरः शुक्लतमः ईयसिष्ठौ डितौ अतिशयेन लघुर्लघीयान् पापीयान् लघिष्ठः पापिष्ठः लघीयसी पापीयसी गुर्वादेरि २

ष्ठेमेयस्सु गरादिष्व लोपश्च इष्ठइमनीयस्सु परेषु गुर्वादेर्गरादिरादेशा हि रलोपश्च गुरोर्भावो गरिमा अतिशयेन
गुरुर्गरिष्ठः गरीयान् गरीयसी युवाल्पयोः कन्वा कनीयान् कनीयसी कनिष्ठः अतिशयेन युवा यवीयान् य
विष्ठः अल्पीयान् अल्पिष्ठः प्रियस्य प्रादेशः प्रियस्य भावः प्रेमा अतिशयेन प्रियः प्रेष्ठः प्रेयान् अतिशयेन स्थूलः
स्थविष्ठः स्थवीयान् अतिशयेन प्रशस्तः श्रेष्ठः श्रेयान् अतिशयेन उरुः वरीयान् वरिष्ठः अतिशयेनः स्थिरः स्थे
ष्ठः स्थेयान् ईलोपो ज्याशब्दादीयसः ज्याशब्दात्परस्य ईयस ईलोपः अतिशयेन वृद्धः प्रशस्यो वा ज्यायान् ज्येष्ठः
वहोरिष्ठे यिः वहोः परस्य इष्ठस्य इलो यिरादेशो वहोर्भूश्च भूयिष्ठः भूयान् किमोव्ययादाख्याताच्च तरतमयोराम्
प्रकर्षे अतिशयेन कुतः कुतस्तरां किंतमां उच्चैस्तरां गायति उच्चैस्तमां पठतितरां पठतितमां परिमाणे द
घ्नट् द्वयसट् मात्रट् जानुपरिमाणमस्य जानुदघ्नं शिरोद्वयसं पुरुषमात्रं द्वयोर्बहूनां वैकस्य निर्धारणे किमादि
भ्योडतरडतमौस्तः भवतोः काणवः कतरः भवतां नां त्रिषुकः कतमः भवतो यैतरस्मात् किं कस्ततरउ डुणेतु संख्ये
यविशेषावधारणे द्वेस्तीयः द्वयोः संख्यापूरणः द्वितीयः त्रेस्तृचचाहीयः तृतीयः षट्कतिकतिपयचतुर्भ्यो
स्थट् षष्ठः कतिथः कतिपयथः चतुर्थः चतुरो यैयो वलोपश्च तुर्यः तुरीयः पंचादेर्मट् पंचमः सप्तमः एका
दशादेरीदट् एकादशः षष्णोरात्वं संख्यायामुत्तरपदेप्राक्शतादनशीतौ द्वादशः अष्टादशः त्रेस्त्रयस्
वात त्रयोदशः विंशत्यादेर्मट् विंशतितमः विंशतेस्तिलोपो डिति विंशः त्रिंशत्तमः त्रिंशः शतादेरनित्यं शततमः
२ षष्टितिः अशीतिः चत्वारिंशदादौ वाष्टनोरात्वं द्विचत्वारिंशत् द्वाचत्वारिंशत् संख्यायाः प्रकारेधाद्वेध

द्वधः२

प्र०स० ॥ कारावचने द्विधा त्रिधा चतुर्धा गणोऽगणवद्वेधा द्वैधं त्रेधा त्रैधं एकादाकिन्नसहाये एकाकी क्रियाया
१८ आवृत्तौ कृत्वसुच् पंचवारानिति पंचकृत्वः सप्तकृत्वः द्वित्रिभ्यां सुः द्विरुक्तं त्रिरुक्तं बहूल्पार्थात् कारकात्
शस् बहुशो ददाति बहुशः अल्पशः तयडुयपरो संख्याया अवयवे द्वितयं त्रितयं द्वयं त्रयं द्वितयी त्रितयी
स्त्रीपुंसाभ्यां नञ्स्नञौ स्त्रियां भवः स्त्रैणः पुंसि भवः पौंस्नः वीप्सायां पदस्य द्विः वृक्षं वृक्षं सिंचति ग्रामो ग्रामो
रमणीयः शेषा निपात्याः कत्यादयः कासंख्या येषां ते कति दाविकः ग्रांग्रापः इति तद्धितप्रक्रिया १

प्र०रू० १

श्रीमते रामानुजाय नमः अथाख्यातप्रक्रिया धातोः वक्ष्यमाणाः प्रत्यया धातोर्ज्ञेयाः भ्वादिः क्रियावाचको भ्वा
दिर्धातुसंज्ञः स्यात् स त्रिधा आत्मनेपदी परस्मैपद्युभयपदी चेति आदनुदात्तङितः अनुदात्तेतो ङितश्च धातोरा
त्मनेपदं स्यात् ञित्स्वरितेत उभे ञितः स्वरितेतश्च धातोरात्मे स्तः परस्मैपदंतु पूर्वोक्तनिमित्ताहीनाद्धातोः पंस्यात्
नवप्रतिवादीनामाद्यानि नव वचनानि पसंज्ञानि स्युः पराण्यान्तु पराणि नव वचनान्यात्मनेपदानि ऽसन्ना
यां वर्तमाने तिप् तस् अंति सिप् थस् थ मिप् वस् मस् ते आते अंते से आथे ध्वे ए वहे महे प्रारब्धोऽपरिसमाप्तश्च
वर्तमानस्तस्मिन्नभिधेये तिवादयः प्रत्ययाः स्युः अस्य तिवादेः पाणिनीयाभा लडिति संज्ञा नाम्नि च युष्मदि चास्म
दि च भागैः नामादिषूपपदेषु त्रिभिर्भागैरेते प्रत्ययाः स्युरात्ययोः नाम्नि प्रयुज्यमाने चाऽप्रयुज्यमानेऽपि प्रथ
मः पुरुषः स्यात् युष्मदि मध्यमः अस्मद्युत्तमः कर्तरि पं च परस्मैपदं कर्तरि स्यात् चाऽऽत्मनेपदमपि तत्रैकत्वे
विवक्षायां प्रथमपुरुषस्यैकवचने भू तिप् पकारः पित्कार्यार्थः अप् कर्तरि धातोरप्प्रत्ययः स्यात् कर्तरि विहिते
षु तिवादिषु चतुर्षु शिपपर्यंतेषु परतः पकारोऽङित्करणेन दज्ञापनार्थः गुणः धातोरंत्यस्य तस्य नामिनो गु
णः स्यात् अवादेशः भवति द्वित्वविवक्षायां भू तस् अपित्तादिर्ङिद्वत् पितं तादिवं च विनान्यप्रत्ययो ङिद्वत्स्या
त् क्ङित्यधुसि क्ङिति ङिति च परे गुणवृद्धी न स्यातां द्विवचनहेतुके उसि तु गुणः स्यात् न तस्तङित्वात् न गु
णः प्राप्तो अप् निमित्तेनागुणः भवतः बहुत्वविवक्षायां भू अंति अदेः अतो लोपः स्यादति च परे भवंति
भवसि भवथः भवथ कोरा अत आत्वं स्यात् मयोः परयोः भवामि भवावः भवामः स साधुर्भवति त्वं साधु

१

भवसि अहं साधु भवामि युगपदाशीलोपस्यैव प्रयोगः साध्वस च त्वं च भवथः विधिसंभावनयोः यात् यातां युस् यास्
यातं यात यां याव याम ईत ईयातां ईरन् ईथास् ईयाथां ईध्वं ईय ईवहि ईमहि विधिः कर्त्तव्यार्थोपदेशः संभावनं क
ल्पनम् हस्तत्रयादादयः स्युः एषां संज्ञा लिङ् यात्प्रतपरो या ईस्यात् अङ्ग भवेत भवेतां याम् इयं अतः परो यामियं स्या
त् भवेयुः भवेव भवेम शिष्यो गुरुस्तु प्रषको भवेव असौ वेदविद्भवेद्ब्राह्मणत्वात् आशीःप्रेरणयोः तुप् तां अंतु
हि तं त आनिप् आवप् आमप् तां आतां अंतां स्व आथां ध्वं ऐप् आवहैप् आमहैप् अप्राप्तप्रार्थनमाशीः प्रेरणा
थ्यशंसनं वा प्रेरणे प्रवर्त्तनं तत्र तुवादयः स्युः एषां संज्ञा लोट् तुह्योस्तातङाशिषि वा वक्तव्यः ङित्वं गुणनिषेधार्थं तत्वं
स्यादेशार्थं भवतु भवतात् भवतां भवंतु अतः अतः परस्य हेर्लुक् कस्मात् भव भवतात् भवतं भवत भवानि भवाव
भवाम आयुष्मान् भवतु भवान् अध्ययनायोद्यतो भवसि अहमात्मविद्भवानि अनद्यतनेऽतीते दिप् तां अन् सि
प् तं त अमिप् व म त आतां अंत थास् आथां ध्वं इ वहि महि अतीतायारात्रेर्यामद्वयादर्वाग्यावदागामिन्याः
प्रथमयामद्वयं दिवसः सकलः सोऽद्यतनस्ततोऽन्योऽनद्यतनस्तस्मिन्नतीते काले दिवादयः स्युः एषां संज्ञा लङ् दिसिमी
नामिरुच्चारणार्थः तनोनसेत्वाल्लोपः दिवादावट् दिवादौ परे धातोरडागमः स्यात् दित्वाददो अभवत् अभव
तां अभवन् अभवः अभवतं अभवत अभवं अभवाव अभवाम ह्योऽभवत् त्वं तुत्रः परोक्षे णप् अतुस् उस् थप्
अथुस् अ णप् व म ए आते इरे से आथे ध्वे ए वहे महे धातोः परोक्षेऽतीते काले णबादयः स्युः एषां संज्ञा लिट् भ
णप् इति स्थिते द्विःस्य णबादियोगे धातोर्द्वित्वं स्यात् सस्वर आदिर्द्विरद्विः सस्वर आद्योऽवयवोऽद्विःकृतो द्विः
स्यात् आभ्यासादौ पूर्वस्यातो भ-श हृस्वश्चास्यात् णबादौ परे हृस्वः पूर्वमंवधिनोर्दीर्घस्य हृस्वः स्यात् रूपाणां

युस् इट् अ
तः परस्येय
स् इडागमः
स्यात् भवेयुः
भवेः भवेत
भवेतं २ अं

प्र०स० जबचपाः पूर्वस्य झपानां जबाभ्यासस्य॥ झढधघभानां जडदगबाः खफछठथानां चटतकपाः भुवो वुक् भुवो
2 वुगागमः स्यात् णादौ स्वरे बभूव बभूवतुः बभूवुः क्रादित्वादिटः क्रसभृवृद्रुस्तुश्रुस्रुड्स्य एतेभ्यः परस्य वसादेर्णा
देरिण न स्यात् अन्यस्मात्तु स्यात् इति नियमादिट् बभूविथ बभूवथुः बभूव बभूव बभूव बभूविव बभूविम व
लिर्वलवान् बभूव आशिषि यात् यास्तां यासुस् यास् यास्तं यास्त यासं यास्व यास्म सीष्ट सीयास्तां सी
रन् सीष्ठास् सीयास्थां सीध्वं सीय सीवहि सीमहि धातोराशिषि यादादयः स्युः एषां संज्ञा लिङ् आशीर्या
दादेः पंक्तित्स्यात् भूयात् भूयास्तां भूयासुः भूयाः भूयास्तं भूयास्त भूयासं भूयास्व भूयास्म सश्रीमा
न् भूयात् श्वस्तने ता तारौ तारस् तासि तास्थस् तास्थ तास्मि तास्वस् तास्मस् ता तारौ तारस् तासे तासा
थे ताध्वे ताहे तास्वहे तास्महे श्वो भाविन्यर्थे तादयः एषां संज्ञा लुट् सिसतासीस्यपामिट् धातोः परेषामेषा
मिडागमः स्यात् भविता भवितारौ भवितारः भवितासि भवितास्थः भवितास्थ भवितास्मि भवितास्वः भवि
तास्मः श्व भविता राज्यनाशो रामस्य स्यादौ भविष्यति स्यप् धातोर्भविष्यति काले स्यप् स्यात् ति वा त्यूणादयस्तु
परेषु एषां संज्ञा लृट् भविष्यति भविष्यतः भविष्यन्ति भविष्यसि भविष्यथः भविष्यथ भविष्यामि भविष्या
वः भविष्यामः भविष्यति कल्कौ भवतारः स्यप् क्रियातिक्रमे क्रियाया अतिक्रमे कुतश्चित्कारणादनिष्पन्नौ
सत्यां स्यप् स्यात् भविष्यत्यर्थे दिवादिपरः एषां संज्ञा लृङ् यदा सुवृष्टिरभविष्यत् तदा सुभिक्षमभविष्यत्
अभविष्यतां अभविष्यन् अभविष्यः अभविष्यतं अभविष्यत अभविष्यं अभविष्याव अभविष्याम भूते सिः
धातोर्भूतमात्रे काले सिप्रत्ययः स्यात् दिवादिपरः एषां संज्ञा लुङ् दादेः पे परस्मैपदे दाधास्थापाभूपि

2

वतिभ्यः परस्य सेर्लोपः स्यात् भुवः सिलोपे ऽयङ्गुकि गुणो न अभूत् अभूतां भुवः सिलोपे स्वरे वुग्वक्तव्य अभूवन् अभूः अभूतं अभूत अभूवं अभूव अभूम अभू. ढि. ति: इति प एध वृद्धौ अदात्मनेपदार्थः पूर्ववद्वा ढिः एधते आदात्मई: अतः परस्मात् आत्मसंबंधिन आत ई स्यात् एधेते एधंते एधसे एधेथे एधध्वे एधे एधावहे एधामहे धर्मादेधतेराज्ञ्य विधिः एधेत एधेयातां एधेरन् एधेथाः एधेयाथां एधेध्वं एधेय एधेवहि एधेमहि आशीः एधतां एधेतां एधंतां एधस्व एधेथां एधध्वं एधे एधावहे एधामहे अनद्यतने स्वरादेः परः स्वरादेर्धातोर्ह्यस्तनीयोरडागमः स्यात् द्विवाद्योपरे ऐधत ऐधेतां ऐधंत ऐधथाः ऐधेथां ऐधध्वं ऐधे ऐधावहि ऐधामहि परोक्षे कासादिप्रत्ययांतादाम कृ अस भू परः कासादेर्धातोर्गुरुनाम्याद्यनेकस्वरस्य श्चणवाद्योपरे आम स्यात् स च कृ अस भू परः प्रयोक्तव्यः कासामट्ययोपितिकासादिः एधाम कृ कृ एइ ति जाते रः पूर्वसंबंधिनः ऋतो ऽत् स्यात् कुहोश्चुः पूर्वसंबंधिनोः कवर्गहकारयोश्चुत्वं स्यात् हस्य वर्गचतुर्थे वर्णः एधांचक्रे एधांचक्राते एधांचक्रिरे एधांचकृषे एधांचक्राथे नामिनो ऽचतुर्णां धोढः नाम्यंताद्धातोरुत्तरस्याशिषा लिट् लुङ् लिटां धस्य ढः स्यात् एधांचकृढ्वे एधांचकृध्वे एधांचक्रे एधांचकृवहे एधांचकृमहे एधिषीष्ट एधिषीयास्तां एधिषीरन् एधिषीष्ठाः एधिषीयास्थां सेटि हसाद्वा धोढः एधिषीढ्वं व्यवधानेपि ढत्वं स्यात् एधिषीध्वं एधिषीय एधिषीवहि एधिषीमहि एधिता एधितारौ एधितारः एधितासे एधितासाथे एधिताध्वे एधिताहे एधितास्वहे एधितास्महे भविष्यति एधिष्यते एधिष्येते एधिष्यंते एधिष्यसे एधिष्येथे एधिष्यध्वे एधिष्ये एधिष्यावहे एधिष्यामहे स्यपि ऐधिष्यत ऐधिष्येतां ऐधिष्यंत

अ॰नृ॰
३

ऐधिष्यथाः ऐधिष्येथां ऐधिष्यध्वं ऐधिष्ये ऐधिष्यावहि ऐधिष्यामहि ऌते ऐधिष्ट ऐधिषातां आतां ऽतो ऽदन्तः
आतां ऽतो ऽस्मादन्तः परस्मात् ऐधिषत ऐधिष्ठाः ऐधिषाथां ध्वे सलोपः ऐधिढ्वं ऐधिध्वं ऐधिषि ऐधिष्वहि ऐधि
ष्महि इत्यात् डुपचष् पाके डुषानुबंधौ कार्यार्थौ चकारेत्वात् स्वरितत्वादुभयपदार्थः पूर्ववदत्वादिः पचति
पचतः पचंति पचते पचेते पचंते पचवसे पचेत् पचेतां पचेयुः पचेत पचेयातां पचेरन् पचेथाः पचतु पच
तात् पचतां पचंतु पचतां पचेतां पचंतां पचस्व पचेथां अपचत् अपचतां अपचन् अपचत अपचेतां अ
पचंत अपचथाः पूर्वस्य हसादिः शेषः पूर्वरूपस्यादिर्हसः शिष्यते अन्ये हसा लुप्यंते पपच अइति जाते अ
त उपधायाः धातोरुपधाया अतो वृद्धिः स्यात् ञ्णिति परे पपाच णादिः कित् न णादिरपित्कित् स्यात् लो
पः पचां कित्ये चास्य पचादीनामनादेशादीनां कित्ति णादौ सेटि थपि च पूर्वस्य लोपो ऽतश्चैकहसमध्यस्था
स्यै [illegible] त्स्यात् पेचतुः पेचुः वेट् थपः स्वरांता ऽकारवतश्च नित्यानिटस्थपो वा ऽट् स्यात् पेचिथ पपक्थ
पेचथुः पेच णबुत्तमो वा णिद्वक्तव्यः पपाच पपच पेचिव पेचिम पेचे पेचाते पेचिरे पेचिषे पेचाथे पेचिध्वे
पेचे पेचिवहे पेचिमहे पच्यात् पच्यास्तां पच्यासुः चोः कुः क्विलास्थः सः कृतस्य पक्षीष्ट पक्षीयास्तां पक्षीर
न् पक्षीष्ठाः नेकस्वरादनुदात्तात् एकस्वराद्धातुपाठे ऽनुदात्तादिनिपठिताद्धातोरिण्न स्यात् स्वरांतेषु ऊदृदं
ताः क्षुप्रभृतयः सेटः रुदैतौ वृङ् वृञ् ओ ऽवर्णान्ताः श्रिवृडीङ् शीङ् डुक्षिञः अदंताः कथादयः ऊदंताः स्नुप्रभृत
यः उदंता रौति स्नौति क्ष्णौति नूर्णोति यौति नौति क्ष्णौति तथा हसांतेषु कांतः शक्ति रेको ऽनिट् घसि वसी सांतौ म
निहनी नांतौ रभियभिलभयो भांताः यमिरमिनमिगमयो मांताः दिहिदुहिमिहिरुहिलिहिवहिनहि

३

दहिलिहयोर्हांताः दृशि दिशि दंशि मृशि स्पृशि रुशि रिशि क्रोशति विशि लिशि इत्याद्यः शांताः कृषि त्विषि तु
षि वं षिसा षिक्कु षिषु शुष्यति पुष्यति स्यन्तयो षांताः शिषि पिषि विषि शुष्यति पुष्यति त्विषि षि विषि षि श्लिषि
तुष्यति दुष्यति द्विषि कर्षति लयः पांताः तपि तिपि आपि वपि स्वपि लिपि लुपि तृप्यति दृप्यति सृप्यति शपि क्षुपि छि
पयः पांताः अदि हदि स्कंदि छिदि भिदि क्षुदि तुदि नुदि स्विद्यति पद्यति खिदि छिदि तुदि नुदि विद्यति विंदयोः दांताः पचि
वचि विचि सिचि रिचि विचि षिचि मुच यश्चांताः छांतः प्रछ तिरेकः रंजि भिजि निजि नजि संजि भ्रस्ज त्यजि यजि युजि रुजि स्वजि
मज्जति नुजि सृजि विजि जयो जांताः एते निटः पक्ता पक्तारौ पक्तारः पक्तासि पक्ता पक्तारौ पक्तारः पक्तासे प
क्ष्यति पक्ष्यतः पक्ष्यंति पक्ष्यते पक्ष्येते पक्ष्यंते पक्ष्यसे अपक्ष्यद्वा न प्रयोगिः प्राज्वलिष्यत् ज्वलनद्रोणौ अपक्ष्यतां
अपक्ष्यन् अपक्ष्यत अपक्ष्येतां अपक्ष्यंत अपक्ष्यथाः लिटि परस्मैपदे परे सिर्णी स्यात् सेः सिशब्दात्परयोर्दिस्यो
रीडागमः अपच् स ई त् इति स्थिते अत उपधाया इति वृद्धिः चोः कुः अपाक्षीत् झसात् झसा तपरस्य सेर्लोपो
झसे परे अपाक्ता स्यादिदः सेरादेर्ता द्धि दश्चा नरस्या नुस स्यात् अपाक्षुः अपाक्षीः अपाक्तं अपाक्त अपाक्षं
अपाक्ष्व अपाक्ष्म अपक्त अपक्षातां अपक्षत अपक्थाः अपक्षाथां अपग्ध्वं अपक्षि अपक्ष्वहि अपक्ष्महि।
इत्युभये पुनरपि परस्मैपदात्मनेपदानयपदाभिप्रायः अपंते चिती संज्ञाने उपधायाश्च लघोः धातोरुपधाया लघो
र्नामिनो गुणः चेतति चेतेत् चेततु अचेतत् चिचेत चिचिततुः चिचितुः चिचेतिथ चित्यात् चेतिता चे
तिष्यति अचेतिष्यत् सेरितीट् इट ईटि इटः परस्य सेर्लोपः स्यात् ईटि परे अचेतीत् अचेतिष्टां अचेति
षुः टुणदि समृद्धौ इदितः इदितो धातोर्नुम् स्यात् आदेः ष्णः स्नः धात्वाद्योः षणयोः स्नौ सः नंदति ननंद

प्र०न्०
४

नो लोपः धातोर्हसां तस्योपधाभूतस्य नस्य लोपः स्यात् क्ङिति परे इति न लोपे प्राप्ते इदितो न लोपो नः ननं
दतुः ननंदुः ननंदिथ नंद्यात् नंदिता नंदिष्यति अनंदिष्यत् अनंदीत् अनंदिषं अनंदिषुः अनंदीः चदि
आह्लादे चंदति चचंद चचंदतुः चचंदुः चचंदिथ चंद्यात् चंदिता अचंदीत् इदि परमैश्वर्ये इंदति ऐंदत् इं
दांचकृ कृञ्चमतिस्थिते धातोर्नामिनः धातोरंत्स्य नू तस्य नामिनो वृद्धिः ञिति णिति च परे इंदांचकार ऋ रं
इंदांचक्रतुः इंदांचक्रुः इंदांचकर्थ इंदांचक्र इंदांचकार इंदांचकर इंदांचकृव इंदामास इंदामासतुः
इंदांबभूव इंद्यात् इंदिता ऐंदीत् उख गतौ ओखति द्वित्वे कृते हसलोपे च उपधाया लघोरिति गुणे
कृते उ ओख अ इति जाते असवर्णे स्वरे परे य्वयोरिवर्णोवर्णयोरियुवौ स्तः उवोख ऊखतुः ऊखुः उवोखि
थ उख्यात् ओखिता ओखिष्यति औखिष्यत् औखीत् षिधु गत्यां सेधति धात्वादेश्च तथा तो सुनमां प्रादेः
परेषां स्वादीनां नमादीनां च धातूनां सनयोः षोस्त्वः षत्वणत्वनिमित्ते सति निषेधति निषेधेत् निषे
धतु अट् द्वित्वव्यवधानेपि षः न्यसेधत् निषिषेध निषिध्यात् निषेधिता निषेधिष्यति न्यषेधीत्
षिधु शास्त्रे मांगल्ये च सेधति सिषेध सिषिधतुः सिषिधुः ऊदितो वा ऊदितो धातोः परस्य वसादेरनपी
ड्वा स्यात् स्वरति सूति सूयति धूञ् रध नश तृप दृप द्रुह मुहां च स्वरति सूति सूयति धूयां क्ति क्सादेर्णादो
नित्यमिट् सिसेधिथ तथोर्द्धः झभांताद्धातोः परयोस्तथयोर्धः स्यात् दधातेने ऊवेजवा सिसेद्ध सिध्या
त् सेद्धिता सेद्धा सेधिष्यति सेत्स्यति असेधिष्यत् असेत्स्यत् अनिटो नामिवतः अवतो नामिवतो
निटो धातोः पेसो वृद्धिः स्यात् असैत्सीत् असैद्धां असैत्सुः असैत्सीः असैद्धं असैद्ध असैत्सं असैत्स्व

४

कटे वर्षावरणयोः कटति कटेत् कटतु अकटत् चकाट कट्यात् कटिता कटिष्यति अकटिष्यत् ह्म्यं
न्तक्षणश्वसजागृण्श्व्येदितां सेटि सिचो न वृद्धिः अकटीत् गुपू रक्षणे आयः गुपूधूपविच्छिपणिपनिभ्यः स्वार्थे आ
यप्रत्ययः स्यात् स धातुः य आदिप्रत्ययान्तः शब्दो धातुसंज्ञः स्यात् गोपायति गोपायेत् गोपायतु अगोपायत् यतः
यस्मात्तस्मान्न पिलोपः स्यात् गोपायांचकार आयादयो न पि वा स्युः जुगोप जुगुपतुः जुगुपुः जुगोपिथ जुगो
प्थ गोपाय्यात् गुप्यात् गोपायिता गोपिता गोप्ता गोपायिष्यति गोपिष्यति गोप्स्यति अगोपायिष्यत् अगो
पिष्यत् अगोप्स्यत् अगोपायीत् अगोपीत् अगोप्सीत् धूप संतापे धूपायति धूपायांचकार दुधूप दुधू
पतुः दुधूपुः धूपाय्यात् धूप्यात् धूपायिता धूपिता धूपायिष्यति धूपिष्यति अधूपायिष्यत् अधूपि
ष्यत् अधूपायीत् अधूपीत् तप संतापे तपति तपेत् तपतु अतपत् तताप तेपतुः तेपिथः ततप्थ
तप्यात् तप्ता तप्स्यति अताप्सीत् अताप्तां अताप्सुः यम उपरमे गमां छः गमयमइषूणां छो विषये यच्छति
यच्छेत् यच्छतु अयच्छत् ययाम येमतुः येमिथ ययंथ येमथुः यम्यात् यंता यंस्यति अयंस्यत् आद
से५ न्तानां यमिरमिनमीनां च सक् सिट् परे अयंसीत् अयंसिष्टां अयंसिषुः णम प्रह्वत्वे शब्दे च प्रणमति प्रण
मेत् प्रणमतु प्राणमत् ननाम नेमतुः नेमिथ ननंथ नम्यात् नंता नंस्यति अनंसीत् अनंसिष्टां अ
नंसिषुः गम्लृ गतौ गच्छति गच्छेत् गच्छतु अगच्छत् वै विस्पाप हृक्वयोरन्यकाले पिण्णि द्विर्वक्तव्यः लप
परितापघणे सुखोऽहं किल विल लोपना हृक लिंगं जगाम गमां स्वरे गमहन् जनखन घसां सुपधाया
लोपः स्यात् किति स्वरे न तु ङे जग्मतुः जग्मुः जगमिथ जगंथ गम्यात् गंता हन्तेः स्यः ह तेरूद्देताच्च

×सस्वार गुणोर्त्तिसंयोगाद्योः अर्त्तेः संयोगादेर्ऋदंतस्य च गुणो य कि यङि किति राण दावाङी यीदादो
च सस्वरतुः सस्वरुः ×२ [redacted]

परस्मैपदस्य इट् स्या जमेस्तुपे गमिष्यति अगमिष्यत् लि सुषादेर्ङ् ः लितः पुषादेश्च ङ् अप्रत्ययः स्यात्पेसेरप धादः अ
गमत् स्वृ शब्दोपतापनयोः स्वरति स्वरिष्य सस्वर्थ स्वर्यात् अस्वारीत् अस्वाषीत् जि जये जयति जयेत् जयतु अ
जयत् सपरोक्तयोर्जेर्गिः आदेशः जिगाय नुधातोः नु विकरणस्य धातोश्च वर्णो वर्णयोरियुवौ स्तः स्वरे परे अने
कस्वरस्यासंयोगपूर्वस्य तु यो जिग्यतुः जिग्युः जिगयिथ जिगेथ जिग्यथुः जिग्य जिगाय जिगिव यै अनपियका
रेपूर्वस्वरस्य दीर्घः जीयात् जेता जेष्यति अजेषीत् अजेष्टां अजेषुः रुष रिष हिंसायां रोषति रोषेत् रु रोषतु रुरु
षतुः रुरुषुः रुरोषिथ रुरुषिव रुष्यात् इषुसहलुभरिषरुषामनि पित सेट्वा रोषिता रोष्टा रोषिष्यति अरोषी
त् रेषति रेषेत् रेषतु अरेषत् रिरेष रिरिषतुः रिरेषिथ रिष्यात् रेषिता रेष्टा रेषिष्यति अरेषीत् व्रज गतौ
व्रजति व्रजेत् व्रजतु व्रजतात् व्रजानि अव्रजत् वव्राज वव्रजतुः वव्रजुः वव्रजिथ व्रज्यात् व्रजिता व्रजि
ष्यति अव्राजीत् अव्राजिष्टां अव्राजिषुः ञिफला विशरणे फलति फलेत् फलतु फलतात् फलतां फ
लंतु अफलत् पफाल ल्फलोदेः ल्फल अपत्तजामे स्वपूर्वलोपो कि लिणादौ सेटि थपि च फेलतुः फेलि
थ फल्यात् फलिता अफालीत् तृ प्लवनतरणयोः तरति तरेत् तरतु तरतात् तराणि अतरत् तता
र ऋसंयोगाणां हिरकितस्यात् ऋ कित्वाद्गुणः तेरतुः तेरुः तेरिथ ऋत इर् क्ङिति परे य्वोर्विहसे इत्वदी
र्घः तीर्यात् ईटो ग्रहां ग्रहादीनामिट इ न तु णादौ वृ ऊ वृ ऋदंता नां वा इट ईत् तरिता तरीता परि
ट्यां न दीर्घः सीणादौ अतारीत् अतारिष्टां अतारिषुः भज सेवायां भजति भजेत् भजतु भजतात् अभ
जत् बभाज भेजतुः भेजुः भेजिथ भज्यात् भक्ता छ शषराजादेः षः ष्टोः कः से धातोः षढयोः

कत्वं स्यात्से परे नत्स्यति अनत्स्यत् अनात्सीत् अनाद्धां अनात्सुः शसु हिंसायां शसति शसेत् शसतु
अशसत् शशास न शसादीनां शस ददवादिगुणभूतानां कारणामेत्वपूर्वलोपौ नस्तः शशसतुः शशसिथ शस्या
त् शसिता अशासीत् पत्ऌ पतने पतति पतेत् पततु अपतत् पपात पेततुः पेतुः पेतिथ पत्यात् पतिता पतिष्य
प ति पतेर्ङे पुमागमः अपप्तत् अव रक्षणे अवति अवेत् अवतु आवत् आव आवतुः आविथ अव्यात् अविता अ
विष्यति आविष्यत् आवीत् टुवमु उद्गिरणे वमति वमेत् अवमत् ववाम ववमतुः ववमिथ ववमिव वम्या
त् वमिता अवमीत् फण गतौ फणति पफाण फणस्यमुस्वनुराजादीनामेत्वपूर्वलोपौ वा फेणतुः पफणतुः
फेणुः पफणुः फेणिथ पफणिथ फण्यात् फणिता अफाणीत् स्यमु स्वनु शब्दे स्यमति सस्याम स्येमतुः सस्य
स्यमिता मतुः स्येमिथ सस्यमिथ स्यम्यात् अस्यमीत् स्वनति स्वनेत् स्वनतु अस्वनत् सस्वान स्वेनतुः सस्वनतुः स्वे
निथ सस्वनिथ स्वन्यात् स्वनिता अस्वानीत् उष दाहे ओषति ओषेत् ओषतु औषत् विदृदरिद्राजागृउषो
वाम् ओषां चकार असवर्णे स्वरे इत्यादिनोव् उवोष उष्यात् ओषिता औषीत् मिह सेचने मेहति मेहेत् अमे
हत् मिमेह मिमिहतुः मिमेहिथ मिह्यात् होढः स्वथोर्धः ष्टुना ष्टुः ढोढे लोपो दीर्घश्च ढस्य ढे परे लोपः स्या
त् पूर्वस्य च दीर्घः मेढा षढोः कः सि मेक्ष्यति अमेक्ष्यत् हशषांतात्सक् हांतात् शांतात् षांतान्नाम्युपधा
दनिटः सक् इवादौ परे न तु इटः अमिक्षत् दह भस्मीकरणे दहति दहेत् दहतु अदहत् ददाह दे
हतुः देहिथ ददग्ध देहथुः दह्यात् दग्धा धक्ष्यति अधाक्षीत् अदाग्धां अधाक्षुः हस हसने हसति।

हसेत् जहास हस्यात् हसिता अहासीत् एजृ कंपने एजति एजेत् एजतु एजांचकार एज्यात् एजिता एजि
ष्यति ऐजीत् ऐजिषां ऐजिषुः मह पूजायां महति महेत् ममाह मेहतुः मेहिथ मह्यात् महिता अमहीत् दृशिर्
प्रेक्षणे दृशादेः पश्यादिश्चतुर्षु दृश ऋ स्र शद सद पा घ्रा ध्मा म्ना दाण स्थां पश्य ऋच्छ धौ शीय सीद पिब जिघ्र
धम मन यछ तिष्ठाः स्युः पश्यति पश्येत् पश्यतु अपश्यत् ददर्श ददृशतुः ददृशुः सृजिदृशोस्थपो वेट् द
दर्शिथ रारोऋसे दृशां दृशादीनां फसे परे अरार आरोरा स्यात् छशषराजादेः षः दद्रष्ठ ददृशिव दृ
श्यात् द्रष्टा द्रक्ष्यति अद्रक्ष्यत् अद्राक्षीत् अद्राष्टां अद्राक्षुः इरितो वा इरितो धातोर्वा ङः स्यात्येसेप
वादः ऋवर्णदृशो ङे गुणः अदर्शत् कृष विलेखने कर्षति चकर्ष चकृषतुः चकर्षिथ कृष्यात् क्रष्टा
क्रक्ष्यति अक्रक्ष्यत् कृषस्पृशमृशां स्पर्धां वा सिः अक्राक्षीत् अक्राष्टां अक्राक्षुः क्रुश आह्वाने रोदने
च क्रोशति क्रोशेत् क्रोशतु अक्रोशत् चुक्रोश क्रुश्यात् क्रोष्टा क्रोक्ष्यति अक्रुक्षत् सृप्लृ गतौ।
सर्पति ससर्प ससृपतुः ससर्पिथ सृप्यात् स्रप्ता स्रप्स्यति असृपत् पा पाने पिबति पिबेत् पिबतु।
अपिबत् आतो णल् औ आदंताद्धातोः परो णल् औ स्यात् पपौ आतोऽनपि अनपि किङिति स्वरे सेट्थपि
चातो लोपः स्यात् पपतुः पपुः पपिथ वेट् पपाथ दादेरे दाधामागेहापिबतिसोस्यामात एत्स्यात् या
दादौ पेयात् पाता पास्यति दादेः पे अपात् अपातां स्याविट्टत्यनउस् उस्यालोपः उसि परे आ
तो लोपः स्यात् अपुः अपाः अपातं अपात अपां अपाव ष्ठा गतिनिवृत्तौ तिष्ठति तिष्ठेत् तिष्ठ

तु अस्तिष्टत् आदेः ष्णस्य निमित्ताभावे नैमित्तिकस्याभावः स्त्याद् इत्यादौ ष्ठिवेश्च नशास्नात्स्वपाः ष्ठिवेः कृते यत्
पूर्वं तस्य पशास्रा स्यराः स्वपाः धात्वन्ते नशास्राः ह्रस्वः ष्टपश्च तस्थौ तस्थतुः तस्थिथ तस्थाथ स्थेयात् स्थाता स्था
स्यति अस्थात् अस्थाताम् अस्थुः अर्च पूजायां अर्चति आर्चत् नुगशां अश्नोतेः ऋदुदः संयोगान्ताकारादेश्च
पूर्वस्य नुगागमेण वादौ आनर्च आनर्चतुः आनर्चुः आनर्चिथ अर्च्यात् अर्चिता अर्चिष्यति आर्चीत् आ
र्चिषां आर्चिषुः अर्द गतौ याचने च अर्दति अर्देत् आर्दत् आनर्द आनर्दतुः आनर्दिथ अर्द्यात् अर्दि
ता आर्दीत् अंचु गतिपूजनयोः अंचति आंचत् आनंच नोलोप इति न लोपे प्राप्ते असंयोगाल्लिट् कि
दिति नलोपो न आनंचतुः आनंचुः आनंचिथ पूजार्थाञ्चेतेर्नलोपो न अंच्यात् गतौ अच्यात् अंचि ता
अंचिष्यति आंचीत् गुपू गुपादिभ्यः स्वार्थे सप्रत्ययः स्यात् तस्मिन् सति धातोर्द्वित्वं कित रोगापनय
ने संशये च सधातुः अतः चिकित्सति चिकित्सेत् चिकित्सतु अचिकित्सत् चिकित्सांचकार चिकित्स्यात्
चिकित्सिता चिकित्सिष्यति अचिकित्सीत् तिज निशाने क्षमायां च तितिक्षति तितिक्षेत् अतितिक्षत्
तितिक्षांचकार तितिक्ष्यात् तितिक्षिता अतितिक्षीत् ऋछ गतौ ऋच्छति ऋच्छेत् ऋच्छतु आर्च्छत् आर गु
णर्तिसंयोगाद्योः ऋतश्च संयोगादेः [illegible] किति [illegible] आरतुः आरुः
अत्यर्तिव्ययतीनां थपो नित्यमिट् आरिथ अर्यात् अर्ता अरिष्यति सर्तिशास्त्यर्तिभ्यो लुङि सेरङ्वा
दः आरत् अपि रंजि दंशषंजष्वंजां शषां नस्य लोपः स्यात् शपि परे दंश दशने दशति दशेत् दशतु अदशत्

०रू०
७

ददंश ददंशतुः ददंशिथ दश्यात् दंष्टा दंक्ष्यति अदाङ्क्षीत् अदांष्टां अदाङ्क्षुः षंज संगे सजति सजे
तु असजत् ससंज सज्यात् संक्ता संक्ष्यति असाङ्क्षीत् ग्लै म्लै हर्षक्षये ग्लायति ग्लायेत् ग्लायतु अ
ग्लायत् संध्यक्षराणामात्वं स्यादनपि जग्लौ जग्लतुः जग्लिथ जग्लाथ संयोगादेरादंतस्य किङ्लिपे यादेश
वेद्वा ग्लेयात् ग्लायात् ग्लाता ग्लास्यति अग्लासीत् अग्लासिष्टां अग्लासिषुः कै गै रै शब्दे कायति च
के कायात् काता कास्यति अकासीत् अकासिष्टां गायति गायेत् गायतु अगात् जगौ जगतुः जगि
थ गेयात् गाता गास्यति अगासीत् रायति ररौ ररिथ रराथ रायात् राता अरासीत् ध्यै चिंतायां ध्यायति ध्या
येत् ध्यायतु अध्यायत् दध्यौ दध्यतुः अधयत् दधौ दधतुः धेयात् धाता धास्यति दाधाघ्वदाप् इति सेनिस्थलो
पे घ्राधे शाच्छासाघ्राधेटां वा सिलोपः अधात् अधातां अधुः अधासीत् अधासिष्टां अधासिषुः श्रुश्र
वणे श्रुवः शृ आदेशो नुप्रत्ययश्च छिषये नपः नुप्रत्ययस्य उपधू प्रत्ययस्य च गुणः स्यात् पिति शृणोति ते
शृणुतः शृण्वंति शृणोषि शृणुथः शृणुथ शृणोमि उकारो वा लोपः प्रत्ययसंबंधिनो धातोश्चासंयोगा
दुत्तरस्य उतो लोपो वा म्वोः परयोः शृण्वः शृण्मः शृणुवः शृणुमः शृणुयात् शृणोतु शृणुतात् शृण्वंतु
उवोदेः प्रत्ययसंबंधिन उतः परस्य हेर्लुक् वा शाहा संयोगात्परस्य न तत्र शृणुहि अत्र न स्यात् शृणु शृणुता
त् शृणुतं शृणवानि अशृणोत् अशृणुतां अशृण्वन् शुश्राव नु धातोः शुश्रुवतुः शुश्रुवुः शुश्रोथ शु
श्रुव श्रूयात् श्रोता श्रोष्यति अश्रौषीत् अश्रौष्टां अश्रौषुः क्षि क्षये क्षयति क्षयेत् चिक्षाय [illegible] ७

य धे
ध्याधा
पाता
यति
सीत्
ने ध
धयेत
तु

चिक्षियतुः चिक्षियिथ चिक्षेथ चिक्षियिव क्षीयात् क्षेता क्षेष्यति अक्षैषीत् अक्षैष्टां स्रु गतौ स्रवति स्रवेत्
अस्रवत् सुस्राव सुस्रुवतुः सुस्रोथ सुस्रुव स्रूयात् स्रोता श्रिस्रुद्रुप्योडो धातोर्द्विश्च लुङि [illegible] सरनावः असु
स्रुवत् द्रु गतौ द्रवति द्रवेत् अद्रवत् दुद्राव दुद्रुवतुः दुद्रोथ दुद्रुव द्रूयात् द्रोता अदुद्रुवत् तक्ष तनूकरणे
तक्षस्तनूकरणे नुर्वा तक्ष्णोति तक्षति काष्ठं तक्ष्णुयात् तक्षेत् तक्ष्णोतु तक्षतु अतक्ष्णोत् अतक्षत् तत
क्ष ततक्षतुः ततक्षिथ स्कोराद्योश्चेति कलोपः ततष्ठ तक्ष्यात् तक्षिता तष्टा तक्षिष्यति तक्ष्यति अतक्षी
त् अतक्षिष्टां अतक्षिषुः अताक्षीत् अताष्टां अताक्षुः शद्लृ शातने शीयादेशे आत्म्यात् शीयते शीयेत
द शीयतां अशीयत शशाद शेदतुः शेदिथ शशात्थ शद्यात् शत्ता शत्स्यति अशदत् षद्लृ विशरणगत्यवसा
दनेषु सीदति सीदेत् असीदत् ससाद सद्यात् सत्ता सत्स्यति असदत् घ्रा गंधोपादाने जिघ्रति जिघ्रौ
जघ्रतुः जघ्रिथ जघ्राथ घ्रेयात् घ्रायात् घ्राता घ्रास्यति अघ्रासीत् अघ्रात् ध्मा शब्दाग्निसंयोगयोः
धमति धमेत् अधमत् दध्मौ दध्मतुः दध्मिथ दध्माथ ध्मेयात् ध्मायात् ध्माता ध्मास्यति अध्मासीत्
म्ना अभ्यासे मनति मनेत् अमनत् मम्नौ मम्नतुः मम्निथ म्नेयात् म्नाता म्नास्यति अम्नासीत् दाण् दाने
यच्छति यच्छेत् यच्छतु अयच्छत् ददौ ददतुः ददिथ ददाथ ददिव देयात् दाता दास्यति अदात् अदातां
अदुः अत सातत्यगमने अतति अतेत् अततु आतत् आत आततुः आतिथ अत्यात् अतिता
अतिष्यति आतीत् जु रंहसि जवति जवेत् अजवत् जुजाव नानणो र्वः अनपि विषये धातोरुव
र्णस्य वत्वं नस्यात् किंतु उवेव जुजुवतुः जुजुवुः जुजविथ जुजोथ जूयात् जोता जोष्यति अजौषीत्

प्र०मं०
८

अजोषं अजोषुः सृ गतौ धावति शीघ्रगतौ अन्यत्र सरति धावेत् धावतु अधावत् ससार सस्रतुः सस्रुः ससर्थ ससृवया
रादौ मारादौ ऋतोऽरङ् स्यात् इड्व्यवधानात् यङ् इति दीर्घः स्रियात् सर्ता सरिष्यति सर्तिशास्त्यर्तिभ्यो ङः असरत्
रुह बीजजन्मनि प्रादुर्भावे च रोहति रोहेत् रोहतु अरोहत् रुरोह रुरुहतुः रुरोहिथ रुह्यात् रोढा रोक्ष्यति अरुक्षत्
स्कंदिर् गतिशोषणयोः स्कंदति स्कंदेत् चस्कंद स्कंद्यात् स्कंत्ता स्कंत्स्यति अस्कांत्सीत् अस्कांत्तां अस्कदत् वस निवा
से वसति वसेत् अवसत् णवादौ पूर्वस्य यजादीनां ग्रहादीनां च पूर्वस्य संप्रसारणं स्यात् णवादौ परे सस्वरस्य संप्रसा
रणं दीर्घस्य दीर्घः ह्रस्वस्य ह्रस्वः उवास यजाय वराणं य्वृतः संप्रसारणं किति यजादीनां संप्रसारणं स्यात् किति परे यजि
र्वपि वही चैव वेञ् ह्वेञो ह्वयति स्वपी वद्वसी श्वयतिर्वा क्रि रेकादश याजादयः १ घसादेश्च घसि शासि वसीनां सस्य षादे
शः स्यान्निमित्ते सति ऊषतुः ऊवसिथ उवस्थ उष्यात् वस्ता सस्तोनपि सस्य तो नापरस्य वत्स्यति अवात्सीत् अवात्तां अ
वात्सुः वद व्यक्तायां वाचि वदति वदेत् वदतु अवदत् उवाद ऊदतुः उवदिथ उद्यात् वदिता वदिष्यति अवादीत्
टुओश्वि गतिवृद्ध्योः श्वयति श्वयतेर्णादौ वा संप्रसारणं पक्षे द्वित्वं शुशाव शुशुवतुः शुशविथ शिश्वाय शिश्वि
यतुः शिश्वयिथ शूयात् श्वयिता अश्वयीत् श्वयतेरिलोपो ङे अश्वत् श्वयतेर्ङे द्वित्वं वा एरलोपः पक्षे अशिश्वि
यत् अशिश्वियतां इति पं ईक्ष दर्शनांकनयोः ईक्षते ईक्षेत ईक्षतां ऐक्षत ऐक्षेतां ऐक्षंत ईक्षांचक्रे ईक्षिषीष्ट ई
क्षिता ईक्षितासे ईक्षिष्यते ऐक्षिष्यत ऐक्षिष्येतां ऐक्षिष्यंत ऐक्षिष्ट ऐक्षिषातां ऐक्षिषत ष्वंज परिष्वंगे स्वजते स्व
जेत स्वजतां अस्वजत स्वजेर्णौ द्विर्वा किद्व सस्वजे सस्वजाते सस्वजिरे सस्वंजे सस्वंजाते सस्वंजिरे स्वङ्क्षीष्ट
स्वङ्क्ता स्वङ्क्ष्यते अस्वङ्क्त अस्वङ्क्षातां अस्वङ्क्षत त्रपूष् लज्जायां त्रपते त्रपेत त्रपतां अत्रपत तॄफलभजत्र
पामित्येत्वं त्रेपे त्रेपाते त्रेपिरे त्रेपिषे त्रेपिषीष्ट त्रपिता त्रप्ता त्रपिष्यते त्रप्स्यते अत्रप्स्त अत्रपिष्ट अत्रपिषातां अ

व
८

त्रपिषत अत्रप्स अत्रप्सातां अत्रप्सत अत्र स्नाः गुपू गोपन कुत्सनयोः गुप्स्य इति सः जुगुप्सते जुगुप्सेत जुगुप्सा
तां अजुगुप्सत जुगुप्सां चक्रे जुगुप्सिषीष्ट जुगुप्सितासे जुगुप्सिते अजुगुप्सिष्यत अजुगुप्सिष्ट अजुगुप्सिषातां ष्य २
अजुगुप्सिषत मान विचारणे यस्मे पूर्वस्मात इत्यात्सेपरे मानादीनां सेपरे दीर्घो नक्षश्चाः मीमांसते मीमांसां
सि४ चक्रे मीमांसिषीष्ट मीमांसिष्ट बध निरोधायां आदि जवानामिति नः वीभत्सते वीभत्सेत वीभत्सां चक्रे वीभत्सि अ४
षीष्ट वीभत्सितासे वीभत्सिष्यते अवीभत्सिष्ट दान शान तेजने दीदांसते दीदांसां चक्रे दीदांसिषीष्ट दीदां
सितासे अदीदांसिष्ट शीशांसते शीशांसेत शीशांसां चक्रे शीशांसिषीष्ट शीशांसिता शीशांसिष्यते अशीशां
सिष्ट पण व्यवहारे स्तुतौ च पन च पणायति स्तुतावेवायः तदा त्वायप्रत्ययांता तपणेर्नात् पणते इत्यत्र चरि
तार्थत्वात् पणते पणतां अपणत अपणायां चकार पेणे पणाय्यात् पणिषीष्ट पणायितासि पणितासि
पणायिष्यति पणिष्यते अपणायिष्यत अपणिष्यत अपणायीत् अपणायिष्टां अपणायिषुः अपणिष्ट
अपणिषातां अपणिषत एवं पनायति पनते घट चेष्टायां घटते घटेत घटतां अघटत जघटे घटिषीष्ट घ
टिता घटिष्यते अघटिष्ट माङ्माङ्योगे इटो लोपः स्यात् मा घटिष्ट स्मयोगेपि अटो लोपः एवं स्मरत् मा
उलुङि वर एवं मान्त ईह चेष्टायां ईहते ईहेत ईहां चक्रे ईहिषीष्ट ईहिता ऐहिष्ट ऊह वितर्के ऊहते
ऊहेत औहत ऊहां चक्रे ऊहिषीष्ट ऊहिता औहिष्ट कासृ शब्दकुत्सायां कासते कासां चक्रे कासि
षीष्ट कासितासे कासिष्यते अकासिष्ट काशृ दीप्तौ काशते अकाशत चकाशे चकाशाते चकाशि

१०७० रे चकाशिषे काशिषीष्ट काशितासे अकाशिष्यत अकाशिष्ट डीङ् विहायसा गतौ डयते डयेत डयतां अड-
५ यत डिड्ये डिड्याते डिड्यिरे डयिषीष्ट डयिता अडयिष्ट द्युत दीप्तौ द्योतते द्योतेत द्योततां अद्योतत द्युतेः पू-
र्वस्य संप्रसारणं दिद्युते दिद्युताते दिद्युतिरे दिद्युतिषे द्योतिषीष्ट द्योतितासे द्योतिष्यते द्युतादिभ्यो लुङि
वा पंपदः स्यात् अद्युतत् अद्योतिष्ट श्विता वर्णे श्वेतते श्वेतेत श्वेततां अश्वेतत शिश्विते शिश्विताते शि-
श्वितिरे शिश्वितिषे श्वेतिषीष्ट श्वेतिता अश्वितत् अश्वेतिष्ट ञिमिदा स्नेहने मेदते अमेदत मिमिदे मिमि-
दिषे मेदिषीष्ट मेदितासे मेदिष्यते अमिदत् अमेदिष्ट ञिष्विदा स्नेहनमोचनयोः ञिक्ष्विदा च ष्वेदते शि-
ष्विदे शिष्विदिवहे ष्वेदितासे अष्विदत् अष्वेदिष्ट क्ष्वेदते क्ष्वेदेत अक्ष्वेदत चिक्ष्विदे चिक्ष्विदिवहे क्ष्वे-
दिषीष्ट क्ष्वेदिता अक्ष्विदत् अक्ष्वेदिष्ट रुच दीप्तावभिप्रीतौ च रोचते रुरुचे रोचिषीष्ट अरुचत् अरोचि-
ष्ट वृतु वर्तने वर्तते ववृते ववृताते ववृतिरे ववृतिषे वर्तिषीष्ट वर्तिता वृद्भ्यः स्यसपोर्वा वृतादिभ्यः
स्यसन् पर्येया नो पं स्यात् न वृद्भ्यश्चतुर्भ्यः वृतादिभ्यः परेनेट् वर्त्स्यति वर्तिष्यते अवर्त्स्यत् अवर्तिष्यत अववृतत्
अवर्तिष्ट वृधु वृद्धौ वर्धते ववृधे ववृधिषे वर्धिषीष्ट वर्धितासे वर्त्स्यति वर्धिष्यते अवृधत् अवर्धि-
ष्ट शृधु शब्दकुत्सायां शर्धते शशृधे शशृधिषे शर्धिषीष्ट शर्त्स्यति शर्धिष्यते अशृधत् अशर्धिष्ट
स्यंदू प्रस्रवणे स्यंदते स्यंदेत अस्यंदत सस्यंदे सस्यंदिवहे स्यंदिषीष्ट स्यंत्सीष्ट स्यंदिता स्यंत्ता स्यंत्स्यति
स्यंदिष्यते अस्यंदत् अस्यंदिष्ट अस्यंत्त अस्यंत्सातां अस्यंत्सत कृपू सामर्थ्ये कृपो रो लः कृपेरेफस्य लः ऋ-
तो लृश्च कल्पते कल्पेत चक्लृपे चक्लृपिषे कल्पिषीष्ट सिस्योः सिस्योरनिटोः परत उपधाया गुणो न स्यात्

५

क्लृप्सीष्ट कल्पिता कल्प्ता कल्पिष्यते कल्प्स्यते अकल्पिष्यत अकल्प्स्यत अक्लृपत अकल्पिष्ट अक्लृप्त इति द्युतादिः
रमु क्रीडायां रमते रमेत रमतां अरमत रेमे रेमाते रेमिरे रेमिषे रंसीष्ट रंता रंस्यते अरंस्त अरंसातां अरंसत व्यथ दुःखसंच-
लनयोः व्यथते व्यथेत व्यथेर्णवादेपूर्वस्यसंप्रसारणं विव्यथे विव्यथाते व्यथिषीष्ट व्यथिता अव्यथिष्ट शकि शंकायां
शंकते शशंके शंकिषीष्ट शंकिता अशंकिष्ट अकि लक्षणे अंकते आंकत आनंके अंकिषीष्ट अंकिता आंकिष्ट॥
वाधृ लोडने वाधते ववाधे वाधिषीष्ट वाधिता अवाधिष्ट ढौकृ गतौ ढौकते ढौकेत अढौकत डुढौके ढौकिषीष्ट ढौकि-
ता अढौकिष्ट दधू धारणे दधते देधे देधिषे दधिषीष्ट अदधिष्ट वदि अभिवादनस्तुत्योः इदितो नुम् वंदते वंदेत
अवंदत ववंदे ववंदिषे वंदिषीष्ट वंदिता अवंदिष्ट दद दाने ददते ददेत दददे दददाते दददिरे दददिषे ददि-
षीष्ट अददिष्ट यती प्रयत्ने यतते यतेत यततां अयतत येते येतिषे यतिषीष्ट यतिष्यते अयतिष्ट षह मर्षणे स-
हते सहेत सहे सेहिषे सहिषीष्ट सहिता इषुसहइत्यादिना वेट् सहिवहोरोदवर्णस्य सहिवहोर्धातोरवर्णस्यौत्स्या-
त् ढलोपे सति सोढा सहिष्यते असहिष्यत असहिष्ट तिपृ क्षरणे तेपते तितिपे तिप्सीष्ट तेप्ता अतिप्त अतिप्सातां अ- प्सी
तिप्सत इत्यादि राजृ दीप्तौ राजति राजेत् राजेत राजतु राजतां अराजत् अराजत रराज रेजतुः रराजतुः रेजे रेजाते ररा-
जे राज्यात् राजिषीष्ट राजिता२ राजिष्यति राजिष्यते अराजिष्यत् अराजिष्यत अराजीत् अराजिष्ट खनु खनने ख-
नति खनते खनेत् खनतु खनतां अखनत् अखनत चखान गमांस्वरे चख्नतुः चख्नुः चखनिथ चख्ने चख्नाते खन्यात् चख्निरे२
खनिषीष्ट खनिता२ खनिष्यति खनिष्यते अखानीत् अखनिष्ट हृञ् हरणे हरति हरते हरेत् हरेत हरतु हरतां अ चखनिषे२
ति

प्र०म०
१०

हरत् अहरत जहार जह्रतुः जह्रुः ऋदंतात् थपो नेट् जहर्थ जह्रिव जह्रे जह्राते जह्रिरे ह्रियात् उः ऋ वर्णस्यासिस्यो
रनेटोः परयोर्गुणो न स्यात् हृषीष्ट हर्त्तार हरिष्यति हरिष्यते अहार्षीत् अहार्ष्टं अहार्षुः लोपो ह्रस्वात् झसे ह्रस्वात्परस्य से
लोपो झसे परे अहृत अहृषातां अहृषत भृञ् भरणे भरति भरते भरेत् भरेत भरतु भरतां अभरत् अभरत वभार
वभ्रतुः वभ्रुः वभर्थ वभृव वभ्रे वभ्राते वभ्रिरे वभृषे वभृवहे भ्रियात् भृषीष्ट भर्त्तार भरिष्यति अभार्षीत् अभृत॥
धृञ् धारणे धरति धरते दधार दध्रतुः दध्रुः दधर्थ दध्रे दध्राते दध्रिरे ध्रियात् धृषीष्ट धर्त्तार धरिष्यति धरिष्यते
अधार्षीत् अधार्ष्टं अधार्षुः अधृत अधृषातां अधृषत भज सेवायां भजति भजते भजेत् भजेत भजतु भजतां
अभजत् अभजत वभाज भेजतुः भेजुः भेजिथ वभक्थ भेजे भज्यात् भक्षीष्ट भक्तार भक्ष्यति भक्ष्यते अभाक्षीत्
अभाक्तां अभाक्षुः अभक्त अभक्षातां गुहू संवरणे गुहेरुपधाया दीर्घो गुणहेतौ स्वरे गूहति गूहते गूहेत गूहतु गूहेत्
गूहतां अगूहत् अगूहत जुगूह जुगुहतुः जुगुहुः जुगूहिथ जुगोढ जुगुहथु जुगुह जुगूह जुगुहिव जुगुहे जु
गुहाते जुगुहिरे जुगुहिषे जुघुक्षे गुह्यात् गूहिषीष्ट घुक्षीष्ट गूहिता२ गोढार गूहिष्यति घोक्ष्यति गूहिष्य
ते घोक्ष्यते अगूहीत् अगूहिष्टं अगूहिषुः अघुक्षत अगूहिष्ट अघुक्षत श्रिञ् सेवायां श्रयति श्रयते शिश्राय
शिश्रियतुः शिश्रियुः शिश्रयिथ शिश्रिये श्रीयात् श्रयिषीष्ट श्रयिता२ श्रयिष्यति श्रयिष्यते श्रिस्रुद्रुस्र्वोः ङ
तिङः अशिश्रियत् अशिश्रियत त्विष दीप्तौ त्वेषति त्वेषते तित्विषे त्विष्यात् त्विक्षीष्ट त्वेष्टा२ अत्विक्षत् अत्वि
क्षत रंज रागे रजति रजते रजेत् रजेत ररंज ररंजतुः ररंजुः ररंजिथ ररंक्थ ररंजाते ररंजिषे रज्यात् रंक्षीष्ट रंक्ता२ राम०
रंक्ष्यति रंक्ष्यते अरांक्षीत् अरांक्तां अरांक्षुः अरंक्त अरंक्षातां अरंक्षत णीञ् प्रापणे नयति नयते निनाय निन्यतुः १०

निन्युः निनयिथ निनेथ निन्ये निन्याते निन्यिरे निन्यिषे नीयात् नेषीष्ट नेता२ नेष्यति नेष्यते अनैषीत् अनैष्टां अनै-
षुः अनेष्ट। अनेषातां अनेषत यज देवपूजासंगतिकरणदानेषु यजति यजते यजेत् यजेत इयाज ईजतुः ईजुः इ-
यजिथ इयष्ट ईजे इजाते ईजिरे इज्यात् यक्षीष्ट यष्टा२ यक्ष्यति यक्ष्यते अयाक्षीत् अयाष्टां अयाक्षुः अयष्ट अयक्षा-
तां अयक्षत टुवप् बीजसंताने वपति वपते वपेत् वपेत वपतु वपतां उवाप ऊपतुः ऊपुः उवपिथ उवप्थ ऊपे उप्या-
त् वप्सीष्ट वप्ता२ वप्स्यति वप्स्यते अवाप्सीत् अवाप्तां अवाप्सुः अवप्त अवप्सातां अवप्सत वह प्रापणे वहति वह-
ते उवाह ऊहतुः उवहिथ उवोढ ऊहे उह्यात् वक्षीष्ट वोढा२ अवाक्षीत् अवोढां अवाक्षुः अवोढ। अवक्षातां अव-
क्षत व्यय गतौ व्ययति व्ययते वव्याय वव्ययतुः वव्ययुः वव्ययिथ वव्यये वव्ययाते वव्ययिरे वव्ययिषे व्ययात्
व्ययिषीष्ट व्ययिता२ व्ययिष्यति व्ययिष्यते अव्ययीत् अव्ययिष्टां अव्ययिषुः अव्ययिष्ट अव्ययिषातां अव्ययि-
षत वेञ् तंतुसंताने वयति वयते वयेत् वयेत अवयत् अवयत वेञोणल्यैन संप्रसारणं ववौ ववतुः अदंक्
वेञ्नस्यपोनित्यमिट् वविथ ववथुः वव ववौ वविव ववे ववाते वविरे वविषे वेञो वय्णवादौ उवाय ग्र-
हां क्ङिति च ग्रहिज्यावयिव्यधिवष्टिविचतिपृछ्ठतिन ज्जेति वृश्चतीनां ङ्किति परे संप्रसारणं स्यात् वयोयस्पने।
त्वं ऊयतुः उवयिथ ऊयथुः ऊये ऊयाते ऊयिरे ऊयिषे वायात् वासीष्ट वाता२ वास्यति वास्यते अवासीत्
अवास्त व्येञ् संवरणे व्ययति व्ययते व्येञो णवादौ नात्वं विव्याय विव्यतुः विव्युः विव्ययिथ विव्ये विव्याते विव्यि-
रे वीयात् व्यासीष्ट व्याता२ व्यास्यति व्यास्यते अव्यासीत् अव्यासिष्टां अव्यासिषुः अव्यास्त अव्यासातां अव्या-
सत शप आक्रोशे शपति शपते शपेत् शपेत अशपत् अशपत शशाप शेपतुः शेपुः शेपिथ शेपे शेपाते शे-

प्र०न० पिरे शेषिषि शष्यात् शासीष्ट शास्ता २ शास्यति शास्यते अशासीत् अशासां अशासुः अशास अशास्मातां अशासत इ
११ सुने स्वाहिष्व अदन्तलणे अदादेर्लुक् अदादेः परस्य पो लुक् स्यात् अत्ति अत्तः अदंति अत्सि अत्थ अद्मि अद्वः
अद्मः अद्यात् अत्तु अत्तात् अत्तां अदंतु हसाद्धिर्हि हसात् हेर्धिः स्यात् अद्धि अत्तात् अत्तं अत्त अदानि
अदो दिस्योरडागमो वक्तव्यः आदत् आत्तां आदन् आदः आत्तं आत्त आदं अद्व अद्म आद आदतुः आदुः आ-
२दे ५ दिथ लिसयोर्घस्लृ लिटि तु वा जघास गमां स्वरे घस्मादेशः खसे चपा झसानामिति घस्य कत्वं जक्षतुः जक्षुः ज
घसिथ अद्यात् अत्ता अत्स्यति लित्सुघादेर्हितिङः अघसत् अघसतां अघसन् मा माने माति मायात् मातु अमा
त् अमातां स्यादिदः उस्यालोपः अमुः ममौ ममतुः ममुः ममिथ ममाथ मेयात् माता मास्यति अमासीत् अमासिष्टां ला
दानग्रहणयोः लाति लायात् लातु अलात् अलातां अलुः ललौ ललतुः ललुः ललिथ ललाथ लायात् लाता लास्य
ति अलासीत् अलासिष्टां या प्रापणे याति यातः यांति यायात् यातु अयात् अयातां अयुः ययौ ययतुः ययि
थ ययाथ यायात् याता यास्यति अयासीत् अयासिष्टां वा गतिगंधनयोः वाति वायात् वातु अवात् ववौ ववतुः
वविथ ववाथ वायात् वाता अवासीत् रा दाने राति रायात् ररौ ररतुः ररिथ रराथ रायात् राता अरासीत् पा
रक्षणे पाति पातः पांति पायात् पातु अपात् अपातां अपुः पपौ पपतुः पपिथ पपाथ पायात् पाता पास्यति अपासी
त् अपासिष्टां भा दीप्तौ भाति भातः भांति भायात् भातु अभात् बभौ बभतुः बभिथ बभाथ भायात् भाता अभासीत्
स्ना शौचे स्नाति स्नायात् स्नातु अस्नात् सस्नौ सस्नतुः सस्नुः सस्निथ सस्नाथ स्नायात् स्नाता अस्नासीत् वश कांतौ व
ष्टि उष्टः उशंति वक्षि उष्ठः उष्ठ वश्मि उश्वः उश्यात् वष्टु उष्टात् उष्टां उशंतु छशषराजादेरिति शस्य षत्वं झसा

११

१×२

ऊर्णुहिः घोऽइति षत्वउत्वं ष्णुतिः ष्णुः उष्णि उष्णात् उष्णं उष्ण वष्णानि हिस्योर्हसात् हसांतात्परयोर्हिसिपोर्लोपः स्या

औषां२ तू अवट् २ अडागमौ औशान् २ अवट् २ औषं २ औषां औष औषां औषव उवाम ऊर्णातुः उवशि थ उश्यात्

वशिता वशिष्यति अवाशीत् ख्या प्रकथने ख्याति ख्यायात् ख्यातु अख्यात् अख्यातां अख्युः चख्यौ चख्य

तुः चखिथ ख्येयात् ख्यायात् ख्याता ख्यास्यति अख्यत् इति वक्ष्ये ख्यातिसौरो लुङि कर्त्तरि अख्यत् हन् हिंसागत्योः

हंति लोपस्त्वनुदात्ततनां अनुदात्तानां नमं तानां तनादीनां च नमस्य लोपः किङति सेहे च हतः गमांस्वरे हनो

घ्नं घ्नंति हंसि हथः हथ हन्मि हन्वः हन्यात् हंतु हतां घ्नंतु जहेधिशाधि हंते जहिः स्ते रे धिः शास्तेः शाधि

निपात्यते हि विषये जहि हतात् हतं हत हनानि अहन् अहतां अघ्नन् अहन् अहतं अहत अहनं अ

हन्व पूर्वस्य हसादिशेष कुहोश्चुः झसानां जबचपाः अतउपधायाः इति वृद्धिः जघान जघ्नतुः जघ्नुः क्ङिःक्नौ

स्य हंते हस्य घत्वं वाच्यं जघनिथ जघंथ जघ्नथुः जघ्न जघान जघ्निव हंते लुङ्याशिषु लिङि वधादेशः वध्या

त् हंता हनिष्यति जनि वध्योर्न वृद्धिः अवधीत् अवधिष्टां अवधिषुः यु मिश्रणे ऊरौ अद्विकस्य धातो

रुतऔत् स्यादवादौ पित्तसमेसुपरेषु यौति युतः युवंति यौषि युथः युथ यौमि युवः युमः युयात् यौतु युतात्

युतां युवंतु युहि युतात् युत युत यवानि अयौत् अयुतां अयुवन् अयौ अयुतं अयुत अयुवं अयुव

युयाव युयुवतुः युयुवुः युयुविथ यूयात् यविता यविष्यति अयावीत् अयाविष्टां तु गति वृद्धि हिंसासु

तुरुस्तुशम्यो हिङ्क्ने स्या हसादीनां च तुर्णो मोऽन्तः तौति तवीति तुतः तवीतः तुवंति तौषि तवीषि तुथः तवीथः

प्र०न० १२

तौमि तवीमि तुयात् तुवीयात् तौतु तवीतु तुतां तुवीतां तुवंतु तुहि तुवीहि तुतं तवीतं तवानि अतौत् अतवीत् अतुतां अतुवीतां अतुवन् अतौः अतुवीः अतुतं अतुवीतं अतुत अतुवीत अतुवं अतुव अतुवा व तुताव तुतुवतुः तुतविथ तूयात् तोता तोष्यति अतौषीत् अतौष्टां अतौषुः रु शब्दे रौति रवीति रुयात् रुवीयात् रौतु रवीतु अरौत् अरवीत् रुराव रुरुवतुः रुरविथ रूयात् रविता रविष्यति अरावीत् अराविष्टां अराविषुः षुप्रसवैश्वर्ययोः सौति सुयात् सुषवि सुषाव असौषीत् णुस्तुतौ नौति नुतः नुवंति नुयात् नौतु नवानि अनौत् अनुतां अनुवन् नुनाव नुनुवतुः नुनविथ नूयात् नविता अनावीत् टुक्षु शब्दे क्षौति क्षुतः क्षुवंति क्षुयात् क्षौतु अक्षौत् चुक्षाव चुक्षुवतुः चुक्षविथ क्षूयात् क्षविता अक्षावीत् क्ष्णु तेजने क्ष्णौति क्ष्णुयात् क्ष्णौतु अक्ष्णौत् चुक्ष्णाव चुक्ष्णुवतुः चुक्ष्णविथ क्ष्णूयात् क्ष्णविता अक्ष्णावीत् इण् गतौ एति इतः इणः क्ङिति स्वरे यः यंति एषि इथः इथ एमि इवः इयात् एतु इतात् इतां यंतु इहि इतं इत अयानि ऐत् ऐतां आयन् ऐः ऐतं ऐत आयं ऐव इयाय इणः कितिणादौ दीर्घः ईयतुः ईयुः इययिथ इयेथ ईयथुः ईयात् एता एष्यति दादेः पे इणः सिलोपे गा वक्तव्यः अगात् अगातां अगुः अरे मागाः साध्वसं मागांगावित मंहिरं इक् स्मरणे इङिकावध्युपसर्गतो न व्यभिचरतः अध्येति अधीतः इणवदिक अधियंति अध्येषि अधीथः अधीथ अध्येमि अधीवः अधीयात् अध्येतु अधीतात् अधीतां अधीयंतु अधीहि अध्ययानि अध्यैत् अध्यैतां अध्यायन् अध्यैः अध्यैतं अध्यायं अध्यैव अधीयाय अधीयतुः अधीयुः अधीयेथ अधीयात् अध्येता अध्येष्यति अध्यगात् अध्यगातां अध्यगुः विद् ज्ञाने वेत्ति वित्तः विदंति विदोनवानां

१२

त्यादीनां णल् वा स्यात् विदो उत्तरेषां त्यादीनां णलादिर्नवको वा स्यात् वेद। विदतुः विदुः वेत्थ विदथुः विद वेद
विद्व विद्म विद्यात् वेत्तु विद्धि वित्तं वेदानि अवेत् र् अवित्तां अविदुः दः पदांते दस्य रो वा सिपि अवेः
अवेत् विविद विविदतुः विविदुः विवेदिथ आमि विदेर्न गुणः विदांचकार विद्यात् वेदिता वेदिष्य
ति अवेदीत् लिह आस्वादने होढः स्तथोर्धः ष्टुना ष्टुः उपधायां लघोरिति गुणः लेढ ढि ढ लिस्थितेन ढ्लो
लोपो दीर्घश्च लेढि लीढः लिहंति लेक्षि लीढः लीढ लेह्मि लिह्वः लिह्मः लिह्यात् लेढु लीढात् लीढां
लिहंतु लिहेर्हौ वा इडुक्तव्यः लिहिहि ढ चित्स्पष्टांतत्वमाश्रित्य होढ इति ढत्वं लीढि लीढं लेहानि अले
ट् २ अलिहन् अलेट् अलीढं अलेह लिलेह लिलिहतुः लिलेहिथ लिह्यात् लेढा लेक्ष्यति अलिक्षत्
अस भुवि अस्ति नमसोस्य प्रत्ययस्य न मास्तेश्च धातोरस्तो लोपो ङिति स्तः संति सि सः अस्तेः सस्य लोपः सि
पि असि स्थः स्थ अस्मि स्वः स्मः स्यात् स्यातां स्युः अस्तु स्तात् स्तां संतु एधि स्तं स्त असानि अस्तेरीट् अस्तेः
परयोर्दिस्योरीडागमः आसीत् आस्तां आसन् आसीः आस्तं आस्त आसं आ[illegible] अस्तेरनपि भूरादेशः स ५
बभूव भूयात् भविता अभूत् मृजूष् शुद्धौ मृजेर्वृद्धिः गुणहेतौ क्ङिति स्वरे वा अः मार्ष्टि मृष्टः मृजंति वा ८
मार्जंति मार्क्षि मृष्ठः मृष्ठ मार्ज्मि मृज्वः मृज्यात् मार्ष्टु मृष्टात् मृष्टां मृजंतु मार्जंतु छ्वशराजादेः षः षोडः मृ
ड्ढि मृष्टं मृष्ट मार्जानि अमार्ट् २ अमृष्टां अमृजन् अमार्जन् अमार्ट् २ अमृष्ट अमार्जं अमृज्व ममार्ज
ममृजतुः ममृजुः ममार्जिथ ममार्ष्ठ मृज्यात् मार्जिता मार्ष्टा मार्जिष्यति अमार्क्ष्यति अमार्जीत् अमार्क्षीत् अमार्जीत् २
अमार्जीत् १ अमार्क्षुः वच परिभाषणे वक्ति वक्तः नह्हि वचिरंतिपरः प्रयोक्तव्यः वक्षि वक्थः वक्थ वच्मि वच्यात्

प्र०अ०२० वक्तु वक्तात् वक्तां वग्धि वक्ते वचानि अवक् अवक्तां अवचन् अवक्म अवक्तं अवचं उवाच ऊचतुः ऊचुः
१२ उवचिथ उच्यात् वक्ता वक्ष्यति अक्ष्यति वाक्यख्यातिन्यायः उवचेरम् अवोचत् रुदिर् अश्रुविमोचने रुदादेश्च
तुर्ण्णं हसादेः रुदादेः परस्य तिवादिचतुर्ण्णं मध्ये हकारवसादेः प्रत्ययस्य इट् स्यात् रोदितिः स्वपितिश्चैव श्वसि
तिः प्राणितिस्तथा जक्षितिश्चैव विज्ञेया रुदादिपंचकोगणः १ रोदिति रुदितः रुदंति रोदिषि रोदिमि रुद्यात्
रोदितु रुदितात् रुदितां रुदंतु रुदिहि रुदितात् रुदित रोदानि रुदादेर्दिस्योरडीडागमौ वक्तव्यौ अरोदत्
अरोदीत् अरुदितां अरुदन् अरोदः अरोदीः रुरोद रुरुदतुः रुरोदिथ रुद्यात् रोदिता रोदिष्यति अरो
दीत् अरोदिष्यं ञिष्वप् शये स्वपिति स्वपितः स्वपंति स्वप्यात् स्वपितु स्वपितात् स्वपितां स्वपंतु स्वपिहि स्वपि
तं स्वपानि अस्वपत् अस्वपीत् अस्वपितां अस्वपन् अस्वपः अस्वपी अस्वपितं अस्वपं सुष्वाप सुषुपतुः सु
षुपिथ सुप्यात् स्वप्ता स्वप्स्यति अस्वाप्सीत् अस्वाप्तां अस्वाप्सुः श्वस प्राणने श्वसिति श्वसितः श्वसंति श्वस्यात्
श्वसितु श्वसितात् श्वसितां श्वसंतु श्वसिहि अश्वसत् अश्वसीत् अश्व[illegible]तां अश्वसन् अश्वसः अश्वसीः अ सि७
श्वसितं शश्वास शश्वसतुः शश्वसिथ श्वस्यात् श्वसिता अश्वसीत् अन प्राणने प्रादेरिफाद्नितेर्नस्य णत्वं प्राणि
ति प्राणितः प्राणंति प्राण्यात् प्राणितु प्राणितात् प्राणितां प्राणंतु प्राणानि प्राणत् प्राणीत् प्राणितां प्राणन्
प्राणः प्राणीः आन आनतुः आनिथ प्राण्यात् प्राणिता प्राणिष्यति प्राणीत् प्राणिष्टां प्राणिषुः जक्ष भक्षहसन
योः जक्षिति जक्षितः जक्षादेरंतो दनुस् जक्षिजागृदरिद्राशासचकासः परस्यांत अदनुस्स्यात् उसिच
णः जक्षति जक्ष्यात् जक्षितु जक्षितात् जक्षितां जक्षतु जक्षिहि अजक्षत् अजक्षीत् अजक्षितां अजक्षतुः जजे

हजजक्षतुः जजक्षिथ जक्षात् जक्षिता जक्षिष्यति अजक्षीत् अजक्षिषां अजक्षिषुः इति रुदादिः जागृ निद्राक्ष-
ये जागर्त्ति जागृतः जाग्रति जागर्षि जागृथः जागर्मि जागृवः जागृयात् जागर्तु जागृतां जाग्रतु अजागः अजागृ-
तां अजागरुः जजागार जागर्तेः क्ङिति गुणः जजागरतुः जजागरिथ जागरांचकार जागर्यात् जागरिता जागरि-
ष्यति अजागरीत् अजागरिषां दरिद्रा दुर्गतौ दरिद्राति दरिद्रातेरिदालोपश्च ङिति दरिद्रातेरातो लोपो
ङिति स्वरे इच्च ङिति हसे परे दरिद्रितः दरिद्रति दरिद्रासि दरिद्रिथ दरिद्रियात् दरिद्रातु दरिद्रितां
दरिद्रतु अदरिद्रात् अदरिद्रितां अदरिद्रुः दरिद्रातेरनप्यालोपः सो वा णबुणयुट्सुन ददरिद्रौ ददरिद्र-
तुः ददरिद्रुः ददरिद्रिथ दरिद्रांचकार दरिद्र्यात् दरिद्र्यास्तां दरिद्र्यासुः दरिद्रिता दरिद्रिष्यति अदरि-
द्रीत् अदरिद्रिषां अदरिद्रिषुः अदरिद्रासीत् अदरिद्रासिषां अदरिद्रासिषुः शासु अनुशिष्टौ शास्ति शा-
सेरिः शासेरातो हसे क्ङिति इ च इस्यात् घसादेशः शिष्टः शासति शास्सि शिष्ठः २ शास्मि शिष्वः शिष्मः शिष्या-
त् शास्तु शिष्टां शासतु शाधि हिपि सस्य तः सिपि वा असात् अशिष्टां अशासुः अशात् चकासृ दीप्तौ चकास्ति काद्ध
चकास्तः चकासति चकास्यात् चकास्तु चकास्तां चकासतु धि सलोपः चकाधि चकास्ति चकासानि अचका-
त् अचकास्तां अचकासुः अचकात् अचकाः चकासांचकार चकास्यात् चकासिता चकासिष्यति अचका-
सीत् अचकासिष्टां अचकासिषुः इति पं वशि उ व्यक्तायां वाचि स्कोराद्योश्चेति कलोपः वष्टे वशाते वशते
वक्षे वशाथे वड्ढ्वे वशे वश्वहे वश्महे वशीत वष्टां वशातां वशतां वक्ष्व वशाथां वड्ढ्वं वशै अवष्ट अवशातां अ-
वशत वशिज्ञेन पिख्या ऋणवादौ तु वा वाच्मः सित्वादुत्तेपदे आतोणड्डौ ववशौ ववशतुः ववशुः ववशिथ ववशे

अशाः शशा
स शशासतुः
शशासुः शशा
सिथ शिष्यात्
शासिता शा
शिष्यति अ
शिषत् ६

प०न०
१८

चख्याते चखिरे चख्खे चचक्षाते चचक्षिरे चचक्षिषे ख्यायात् ख्येयात् ख्यासीष्ट ख्याता२ ख्यास्यति ख्यास्यते अ
ख्यास्यत् अख्यास्यत पुषादित्वात् ङः अख्यत् अख्यत ईर गतौ कंपने च ईर्त्ते ईराते ईरते ईरीत ईर्त्तां ईरातां ईर्ष्व
ईराथां ईर्ध्वं ऐर्त्त ऐरातां ऐरत ईरांचक्रे ईरिषीष्ट ईरिता ईरिष्यते ऐरिष्ट ऐरिषातां ऐरिषत ईड स्तुतौ ईट्टे ई
डाते ईडते ईडीशिस्यांसध्वयोरिट् ईडिषे ईडाथे ईडिध्वे ईडीत ईडीयातां ईडीरन् ईट्टां ईडातां [illegible] ई इडतां२
डिष्व ईडाथां ईडिध्वं ऐट्ट ऐडातां ऐडत ऐट्ठाः ऐडाथां लङो ध्वस्य नेट् ऐड्ढ्वं ऐडि ईडांचक्रे ईडे ईडाते ईडिषे
ई[illegible]डिषीष्ट ईडिता ईडिष्यते ऐडिष्ट ईश ऐश्वर्ये ईष्टे ईशाते ईशते ईशिषे ईशाथे ईशिध्वे ईशीत ईष्टां ई
शातां ईशतां ऐष्ट ईशांचक्रे ईशे ईशाते ईशिरे ईशिषीष्ट ईशिता ईशिष्यते ऐशिष्ट आस उपवेशने आस्ते
आसाते आसते आसीत आस्तां आसातां आसत आसांचक्रे आसिषीष्ट आसिता आसिष्यते आसिष्ट वस
आच्छादने वस्ते वसाते वसीत वस्तां अवस्त ववसे ववसाते ववसिरे ववसिषे वसिषीष्ट वसिता अवसि
ष्ट षूङ् प्राणिगर्भविमोचने सूते सुवाते सुवते सूतां सुवातां सुवतां सुवै न गुणश्चतुर्षु सुवै सुवावहै असूत
असुवातां असुवत असुषुवि सुषुवे सविषीष्ट सोषीष्ट सविता सोता असोष्ट असविष्ट शीङ् स्वप्ने शीङो गुणश्च
तुर्षु शेते शयाते शीङो रुट् शीङः प्रत्ययांते रुडागमः शेरते शयीत शेतां शयातां शेरतां अशेत अशयाता
तां अशेरत शिश्ये शयिषीष्ट शयिता शयिष्यते अशयिष्ट इङ् अध्ययने अधिपूर्वः अधीते अधीयाते अधी
यते अधीयीत अधीतां अध्यैत अध्यैयातां अध्यैयत ईङो णेर्गा२ अधिजगे अधिजगाते अधिजगिरे अ
ध्येषीष्ट अध्येता अध्येष्यते अध्यैष्ट अध्यैषत इत्यादि द्विष अप्रीतौ द्वेष्टि द्विष्टः द्विषंति द्वेक्षि द्विष्ठः द्विष्ठः १८
अध्यैषातां१

द्वेष्मि द्विष्वः द्विषे द्विषाते द्विष्यात् द्विषीत द्वेष्टु द्विष्टात् द्विष्टां द्विषंतु द्विड्ढि अद्वेट् अद्विष्टां अद्विषन् दि
द्वेष दिद्विषतुः दिद्विषुः दिद्वेषिथ दिद्विषे द्विष्यात् द्विक्षीष्ट द्वेष्टा२ द्वेक्ष्यति द्वेक्ष्यते अद्विक्षत् अद्विक्ष
त दुह प्रपूरणे दोग्धि दुग्धः दुहंति धोक्षि दुग्धे दुह्यात् दुहीत दोग्धु दुग्धां दुहंतु दुग्धि दुग्धं दुग्ध दोहा
नि दुग्धां धुक्ष्व दोहै अधोक्२ अदुग्धां अदुहन् अदुग्ध अदुहतां अदुहत दुदोह दुदुहतुः दुदोहिथ २३
दुदुहे दुह्यात् धुक्षीष्ट दोग्धा२ धोक्ष्यति धोक्ष्यते अधुक्षत् अधुक्षत ष्टुञ् स्तुतौ तुरो स्तौति स्तुवीति
स्तुतः स्तुवीत स्तुते स्तुवीते स्तुयात् स्तुवीयात् स्तुवीत स्तोतु स्तुवीतु स्तुतां स्तुवीतां स्तुष्व स्तुवीष्व अ
स्तौत् अस्तवीत् तुष्टाव तुष्टुवतुः तुष्टोथ तुष्टुवे तुष्टुवाते तुष्टुविरे स्तुयात् स्तोषीष्ट स्तोता२ स्तोष्यति स्तो
ष्यते स्तुसुवोः पेसे इट् अस्तावीत् अस्ताविष्टां अस्तोष्ट अस्तोषातां अस्तोषत ब्रूञ् व्यक्तायां वाचि अ
दावीष्यति हलि ब्रुवईपूप्रत्ययः स्यात् पिति हलि अवादौ परे ब्रवीति ब्रूतः ब्रुवंति ब्रुव आश्च पंचानां ब्रुवः प
श्रा:५ रेषां तिवादीनां णलादयः पंच वा देशाः ब्रुव आहश्च आह आहतुः आहुः तथे आहो हस्थः स्यात् थपरे आत्थ
आहथुः ब्रूथ ब्रवीमि ब्रूवः ब्रूते ब्रुवाते ब्रुवते ब्रूयात् ब्रुवीत ब्रवीतु ब्रूतां ब्रुवंतु ब्रूहि ब्रवाणि ब्रूतां ब्रुवा
तां ब्रुवतां अब्रवीत् अब्रूतां अब्रुवन् अब्रूत अब्रुवातां अब्रुवत ब्रुवो वचिः उवाच ऊचतुः उवचि
थ ऊचे ऊचाते ऊचिरे ऊचिषे उच्यात् वक्षीष्ट वक्ता२ वक्ष्यति वक्ष्यते उ वचेरम् अवोचत् अवोचत उणि॥

प्र०भू०
१५

ऊर्णुञाच्छादने ऊर्णौति ऊर्णुतः ऊर्णुवंति ऊर्णुते ऊर्णुवाते ऊर्णुवते ऊर्णुयात् ऊर्णुवीत ऊर्णौतु ऊर्णुतां
ऊर्णुवंतु ऊर्णुहि ऊर्णवानि ऊर्णोर्गुणो दिस्योः और्णोत् और्णुतां और्णुवन् और्णोः और्णवं ऊर्णोराम्न स्व
रादेपरः स्वरादेर्धातोर्द्वितीयोवयवो द्विरुक्तः सस्वरो द्विः स्यात् स्वरात्पराः नदराः संयोगादयो द्विर्न ऊर्णुना
व ऊर्णुनुवतुः ऊर्णुनविथ ऊर्णुनुवे ऊर्णूयात् ऊर्णविषीष्ट ऊर्णविता और्णावीत् और्णविष्टां और्ण
विषुः और्णविष्ट और्णविषातां और्णविषत इत्युभे अदादयश्च हु दानादनयोः ह्वादेर्द्विश्च हुऽत्यादेरु
त्यन्तस्यापो लुक् धातोर्द्वित्वं च जुहोति जुहुतः ह्रः द्विरुक्तात्परस्यांत अत्स्यात् जुह्वति जुहोषि जुहुथः
जुहुथ जुहोमि उअको वालोपः जुह्वः जुह्मः जुहुवः जुहुमः जुहुयात् जुहोतु जुहुतां जुह्वतु होर्हे द्विः हुधा
तोः परस्य हेर्द्धिस्यात् जुहुधि जुहवानि अजुहोत् अजुहुतां अनउस् द्विरुक्तादन उसस्यात् अजुहवुः
अजुहोः अजुहवं अजुह्व अजुहुव भीहृभृह्रीणां द्विरुक्तानामाम्वा जुहवांचकार जुहाव जुहुवतुः जुहवि
थ हूयात् होता होष्यति अहौषीत् अहौष्टां अहौषुः जिनीनये विनेति ङिति ह्रस्व नीहाकोरिच्छा वि
नितः विनीतः विन्यति विनीयात् विनेतु अविनेत् अविनितां अविनीतां अविनयुः विनयांचकार
विनाय विन्यतुः विन्युः विनयिथ विनेथ नीयात् नेता नेष्यति अनैषीत् अनैष्टां ह्रीलज्जायां जिह्रेति
जिह्रीतः जिह्र्यति जिह्रीयात् जिह्रेतु जिह्रीतात् जिह्रीतां जिह्र्यतु जिह्रयाणि अजिह्रेत् अजिह्रीतां

अजिह्रयुः जिह्रयांचकार जिह्राय जिह्रियतुः जिह्रयिथ जिह्रेथ ह्रीयात् ह्रेता ह्रेष्यति अह्रैषीत् पॄ पा
लनपूरणयोः ऋप्रोश्चि: पूर्वस्य ऋ ओपूर्वस्य इ स्यात् श्लुकि पिपर्त्ति पोर्ऋर पवर्गादुत्तरस्य ऋ वर्णस्योरस्यात् किङि ति
धोर्विहसे पिपूर्तः पिपुरति पिपर्षि पिपूर्यात् पिपर्तु पिपूर्तां पिपराणि ऋप्रोर्दिस्योर ड्रा अपिपरत् अपिपः
अपिपूर्तां अपिपरुः अपिपरः अपिपः अपिपरं पपार पपरतुः पपरिथ पूर्यात् परिता परिष्यति अपारीत्
२५ अपारिष्टां ओहाक् त्यागे जहाति ई हल्यघोः ह्रि ऋ स्य धातोरातो लोपो ङिति स्वरे ई च्च ह्रि ति हसे जहीतः जहति
जहासि हाको यादौ वा लोपः जह्यात् जहातु जहीतां जहतु ई र्वा हौ जहाते हौ परे इ दीतौ वा जहिहि जही
जहाहि ८ हि अजहात् अजहीतां अजहुः जहौ जहतुः जहिथ जहाथ दादेः हेयात् हाता हास्यति अहासीत् ऋ गतौ
अस वर्णे स्वरे इय् इयर्त्ति इयृतः इयृति इयर्षि इयृथ इयर्मि इयृयात् इयर्तु इयृतां इयरतु इयृहि इयरा
णि ऐयः ऐयृतां ऐयरुः आर आरतुः अरिथ अर्यात् अर्त्ता अरिष्यति आरिष्यत् सर्त्तिशास्त्यर्त्तिभ्यां ङिनाङः
आरत् इत्यपि ओहाङ् गतौ भ्रसां लुकि इत् उभ्रञ् हाङ् माङोः पूर्वस्यात इत्स्यात् श्लुकि जिहीते जिहाते जिह
ते जिहीत जिहीतां अजिहीत जहे जहाते जहिरे हासीष्ट हातासे हास्यते अहास्त अहासातां माङ् माने
मिमीते मिमाते मिमते मिमीत मिमीतां अमिमीत ममे मसीष्ट माता मास्यते अमास्त इत्स्यात् उभृञ् धारणपो
षणयोः बिभर्त्ति बिभृतः बिभ्रति बिभृते बिभ्राते बिभ्रते बिभृयात् बिभ्रीत अबिभः अबिभृतां अबिभरुः

प्र०न्रू०
१६

अविभृत अविभ्रातां अविभ्रत विभरांचकार बभार बभ्रतुः बभ्रुः बभर्थ बभ्रे बभ्राते बभ्रिरे बभृषे ब
भृवहे भ्रियात् भृषीष्ट भर्ता २ भरिष्यति भरिष्यते अभार्षीत् अभार्ष्टां अभार्षुः ह्रस्वाङ्से अभृत अभृषातां
अभृषत डुदाञ् दाने ददाति दादेः द्विरुक्तस्यादेरातो लोपः ङिति दत्तः ददति ददासि दत्थः ददामि दद्वः
दद्मः दत्ते ददाते ददते दत्से दद्यात् ददीत ददातु दत्तात् दत्तां ददतु दां दादीनां हौ परे पूर्वस्य लोपः स्यात् दात एच्च
देहि दत्तं दत्त ददानि दत्तां ददातां ददतां दत्स्व अददात् अदत्तां अददुः अददाः अदत्तं अदत्त अददां अ
दद्व २ अदत्त अददातां अददत ददौ ददतुः ददुः ददिथ ददाथ ददे ददाते ददिरे देयात् दासीष्ट दाता २
दास्यति दास्यते अदात् अदातां अदुः दा देरिः दादेर्घोर्नोरिदादेशः किति सिचि त्वमाति अदित अदिषा
तां अदिषत अदिथाः डुधाञ् धारणपोषणयोः दधाति पूर्वस्य ङिति रुसे धः धान्तः पूर्वस्य दस्य धो ङिति
झसे धत्तः दधति दधासि धत्थः धत्ते दधाते दधते धत्से दध्यात् दधीत दधातु धत्तां धेहि धत्तं धत्त दधा
नि धत्तां दधातां दधतां धत्स्व दधाथां धद्ध्वं दधै अदधात् अधत्त दधौ दधतुः दधे धेयात् धासीष्ट धाता २
धास्यति धास्यते अधात् अधित अधिषातां णिजिर् शौचपोषणयोः निजां गुणः निजविजविषां पूर्वस्य गुणो
लुकि नेनेक्ति नेनिक्तः नेनिजति नेनेक्षि नेनिक्थः नेनेज्मि नेनिज्वः नेनिक्ते नेनिजाते नेनिजते नेनिज्यात् नेनिक्तु २
नेनिजीत नेनेक्तु नेनिक्तां नेनिजतु नेनिग्धि नेनिक्तं हेः स्वरेऽपि नोपधाया गुणः द्विरुक्तस्य धातोरपि विषये स्व
रे परे उपधाया गुणो न नेनिजानि नेनिजाव नेनिक्तां नेनिजातां नेनिजतां नेनिक्ष्व नेनिजे अनेनेक् २ अनेनिक्तां

१६

अनेनिजुः अनेनिक्त अनेनिजातां अनेनिजत निनेज निनिजतुः निनेजिथ निनिजे निनिजाते निनिजिरे
नि[illegible]जिषे निज्यात् निक्षीष्ट नेक्ता २ नेक्ष्यति नेक्ष्यते अनिजत् अनैक्षीत् अनैक्तां अनैक्षुः अनिक्त अनिक्षा
तां अनिक्षत विजिर् पृथग्भावे वेवेक्ति वेविक्तः वेविजति वेवेक्षि वेविक्ते वेविजाते वेविजते वेविज्यात् वे
विजीत वेवेक्तु वेविक्तां वेविजतु वेविग्धि वेविजानि वेविक्तां वेविजातां वेविजतां अवेवेक् २ अवेविक्तां
अवेविजुः अवेविक्त अवेविजातां अवेविजत विवेज विविजतुः विवेजिथ विविजे विविजाते विविजिरे
विविजिषे विज्यात् विक्षीष्ट वेक्ता २ वेक्ष्यति वेक्ष्यते अविजत् अवैक्षीत् अवैक्तां अवैक्षुः अविक्त अवि
क्षातां अविक्षत विष्लृ व्याप्तौ वेवेष्टि वेविष्टः वेविषति वेवेक्षि वेविष्ठ वेविषाते वेविषते वेविष्यात् वेवि
षीत वेवेष्टु वेविष्टां वेविषतु वेविड्ढि वेविषाणि वेविष्टां वेविषातां वेविषतां वेविक्ष्व वेविषै अवेवेट्
७५ अवेविष्टां अवेविषुः अवेविष्ट अवेविषातां अवेविषत विवेष विविषतुः विवेषिथ विविषे विविषाते
विविषिरे विविषिषे विष्यात् विक्षीष्ट वेष्टा २ वेक्ष्यति वेक्ष्यते अवेक्ष्यत् अवेक्ष्यत अविषत् अविक्षत अ
विक्षेतां अविक्षंत इत्युभेह्वा विष्ल दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकांतिगतिषु दिवा
देर्यः दिवादेर्गणाद्यः प्रत्ययः स्याच्चतुर्षुपरेषु अपोपवादः : चोर्विंहसे दीव्यति दीव्यतः दीव्यंति दीव्यसि दीव्य
थः दीव्यथ दीव्यामि दीव्येत् दीव्येतां दीव्येयुः दीव्यतु दीव्यतात् दीव्यतां दीव्यंतु दीव्य दीव्यतात् दीव्या
नि अदीव्यत् अदीव्यतां अदीव्यन् दिदेव दिदिवतुः दिदिवुः दिदेविथ दीव्यात् देविता देविष्यति अदे
विष्यत् अदेवीत् अदेविष्टां अदेविषुः षिवु तंतुसंताने सीव्यति सीव्यतः सीव्यतु असीव्यत् सिसेव सि

प्र०सू० सिवतुः सिसेविथ सीव्यात् सेविता सेविष्यति असेवीत् नृती गात्रविक्षेपे नृत्यति नृत्येत् नृत्यतु अनृत्यत् ननर्त्त
२१ नृत्यात् नर्त्तिता नर्त्तिष्यति अनर्त्तिष्यत् अनर्त्तीत् त्रसी उद्वेगे त्रस्यति त्रस्येत् त्रस्यतु अत्रस्यत् तत्रास तत्रसतुः तत्र- तत्रसुः २
सिथ त्रस्यात् त्रसिता त्रसिष्यति अत्रासीत् जृष वयोहानौ ॠतइर् जीर्यति जीर्येत् जीर्यतु अजीर्यत् जजार जजरतुः
जजरिथ जीर्यात् जरिता जरिष्यति अजारीत् अजारिष्टां अजारिषुः शो तनूकरणे श्योः यप्रत्ययधातोरोतो लोपः
श्यात् श्याति श्यतः श्यति श्येत् श्यतु श्यतात् अश्यत् शशौ शशौ शायात् शाता शास्यति अशासीत् अशासिष्टां अशा-
तां अशुः छो छेदने छ्यति छ्येत् छ्यतु अछ्यत् चच्छौ चच्छतुः चच्छिथ छायात् छाता छास्यति अच्छासीत् अ-
छात् अछातां अछुः षो अंतकर्मणि स्यति स्येत् स्यतु अस्यत् ससौ ससतुः ससिथ ससाथ सायात् साता असासीत्
व४ असात् दो अवखंडने द्यति द्येत् द्यतु अद्यत् ददौ देयात् दाता अदासीत् राध साध संसिद्धौ राध्यति राध्येत् रा-
ध्यतु अराध्यत् रराध रराधतुः रराधिथ रराद्ध राध्यात् राद्धा रात्स्यति अरात्सीत् अराद्धां अरात्सुः साध्यति सा-
ध्येत् साध्यतु असाध्यत् ससाध ससाधतुः ससाधिथ ससाद्ध साध्यात् साद्धा सात्स्यति असात्सीत् असात्सुः व्य-
धू ताडने विध्यति विध्येत् विध्यतु अविध्यत् विव्याध विविधतुः विव्यधिथ विव्यद्ध विध्यात् व्यद्धा व्यत्स्यति अ-
व्यात्सीत् पुष पुष्टौ पुष्यति पुष्येत् पुष्यतु अपुष्यत् पुपोष पुपुषतुः पुपोषिथ पुष्यात् पोष्टा पोक्ष्यति अपुषत्
मुष खंडने मुष्यति मुष्येत् मुष्यतु अमुष्यत् मुमोष मुष्यात् मोष्टा मोक्ष्यति अमुषत् तुष प्रीतौ तुष्यति तुष्ये-
त् तुष्यतु अतुष्यत् तुतोष तुष्यात् तोष्टा तोक्ष्यति अतुषत् दुष वैकृते दुष्यति दुष्येत् दुष्यतु अदुष्यत् दुदोष
दुदुषतुः दुदोषिथ दुष्यात् दोष्टा दोक्ष्यति अदुषत् क्रुध कोपे क्रुध्यति क्रुध्येत् क्रुध्यतु अक्रुध्यत् चुक्रोध चुक्रु- ७०

धतुः चुक्रोधिथ क्रुध्यात् क्रोद्धा क्रोत्स्यति अक्रुधत् क्षुध बुभुक्षायां क्षुध्यति क्षुध्येत् क्षुध्यतु अक्षुध्यत् चुक्षो
ध चुक्षुधतुः चुक्षोधिथ क्षुध्यात् क्षोद्धा क्षोत्स्यति अक्षुधत् शुध शौचे शुध्यति शुध्येत् शुध्यतु अशुध्यत् शु
शोध शुध्यात् शोद्धा शोत्स्यति अशुधत् षिधु संराधौ सिध्यति सिध्येत् सिध्यतु अ[illegible]ध्यत् सिषेध सिध्यात् सि ३
सेद्धा सेत्स्यति असिधत् णश अदर्शने नश्यति नश्येत् नश्यतु अनश्यत् ननाश नेशतुः नेशिथ मस्जिनशो
र्झलि नुम् ननंष्ठ नेशथुः नश्यात् नशिता नंष्टा नशिष्यति नंक्ष्यति अनशत् शमु दमु उपशमे शमां दीर्घः शमादी
नां दीर्घो यपरे शाम्यति शाम्येत् शाम्यतु अशाम्यत् शशाम शेमतुः शेमिथ शम्यात् शमिता शमिष्यति अश
मत् दाम्यति दाम्येत् दाम्यतु अदाम्यत् ददाम देमतुः देमुः दम्यात् दमिता अदमत् तमु कांक्षायां ताम्यति ता
म्येत् ताम्यतु अताम्यत् तताम तम्यात् तमिता अतमत् भ्रमु अनवस्थाने भ्राम्यति भ्राम्येत् बभ्राम बभ्रमतुः
भ्रम्यात् भ्रमिता अभ्रमत् क्षमूष सहने क्षाम्यति क्षाम्येत् अक्षाम्यत् चक्षाम चक्षमतुः चक्षमिथ चक्षंथ क्ष
म्यात् क्षमिता क्षंता क्षमिष्यति क्षंस्यति अक्षमत् क्लमु ग्लानौ क्लाम्यति क्लाम्येत् अक्लाम्यत् चक्लाम क्लम्यात्
क्लमिता अक्लमत् श्रमु तपसि खेदे च श्राम्यति श्राम्येत् श्राम्यतु अश्राम्यत् शश्राम शश्रमतुः शश्रमिथ
श्रम्यात् श्रमिता अश्रमत् मदी हर्षे माद्यति अमाद्यत् ममाद मेदतुः मेदिथ मद्यात् मदिता अमदत्
इति शमादिः कुप क्रोधे कुप्यति कुप्येत् कुप्यतु अकुप्यत् चुकोप कुप्यात् कोपिता अकुपत् लुभ अभिकां
क्षायां लुभ्यति अलुभ्यत् लुलोभ लुलुभतुः लुभ्यात् लोभिता इषुसहलुभेत्यादिना वेट् लोब्धा लोभिष्यति अ

प्र० न०
१८

लुभत् ञितृष पिपासायां तृष्यति ततर्ष ततृषतुः ततर्षिथ तृष्यात् तर्षिता अतृषत् हृष तुष्टौ हृष्यति जहर्ष
जहृषतुः जहर्षिथ हृष्यात् हर्षिता अहृषत् तृप प्रीणने तृप्यति ततर्प ततृपतुः ततर्पिथ ततर्प्थ तृप्यात् त्र-
प्ता तर्पिता त्रप्स्यति तर्पिष्यति अतर्पीत् अत्राप्सीत् अत्राप्तां अत्राप्सुः अतृपत् दृप हर्षगर्वयोः दृप्यति अ-
दृपत् ददर्प ददृपतुः ददर्पिथ ददर्प्थ दृप्यात् द्रप्ता द्रप्स्यति अद्राप्सीत् अदर्पीत् अद्राप्तां अद्राप्सुः अदृप-
त् द्रुह जिघासायां द्रुह्यति दुद्रोह दुद्रोहिथ द्रोहिता द्रोहिष्यति ध्रोक्ष्यति अद्रुहत् मुह वैचित्ये मुह्यति
मुमोह मुमोहिथ मुमोढ मोहिता मोढा अमुहत् असु क्षेपणे अस्यति अस्येत् अस्यतु आस्यत् आस आसतुः आसि-
थ आस्यात् असिता असिष्यति अस्यतेस्थुक् ङे आस्थत् लुड विलोडने लुड्यति अलुड्यत् लुलोड लुलुड-
तुः लुलोडिथ लुड्यात् लोडिता अलुडत् इति पुषादि पंव षूङ् प्राणिप्रसवे सूयते सूयेते सूयंते अस्-
यत असूयेतां असूयंत सुषुवे सविषीष्ट सविता सवितासे असविष्ट असविषातां असविषत दूङ् परि-
तापे दूयते दूयेत दूयतां अदूयत दुदुवे दविषीष्ट दविता दवितासे अदविष्ट माङ् माने मायते मायेत
मायतां अमायत ममे ममाते ममिरे ममिषे मासीष्ट माता मातासे मास्यते अमास्त अमासातां जनी प्रादुर्भा-
वे ज्ञाजनोर्जा आदेशाश्चतुर्थे जायते जायेत जायतां अजायत गमांस्वरे जज्ञे जज्ञाते जज्ञिरे जनिषीष्ट ज-
नितासे अजनिष्ट अजनिषातां तप ऐश्वर्ये तप्यते तप्येत अतप्यत तेपे तेपाते तेपिरे तेपिषे तप्सीष्ट तप्ता-
से तप्स्यते अतप्स्यत अतप्त अतप्सातां पद गतौ पद्यते अपद्यत पेदे पेदाते पेदिरे पत्सीष्ट पत्तासे पत्स्यते

१८

अपत्त अपत्सातां विद सत्तायां विद्यते अविद्यत विविदे वित्सीष्ट वेत्तासे वेत्स्यते अवित्त अवित्सातां
बुध अवगमने बुध्यते बुबुधे भुत्सीष्ट बोद्धासे भोत्स्यते अबुद्ध अभुत्सातां अभुत्सत युध संप्रहारे युध्यते अयुध्यत
युयुधे युयुधाते युत्सीष्ट योद्धा योत्स्यते अयुद्ध अयुत्सातां अयुत्सत मन ज्ञाने मन्यते मन्येत मेने मंसीष्ट मंता
से मंस्यते अमंस्त अमंसातां सृज विसर्गे सृज्यते असृज्यत ससृजे ससृजाते ससृजिरे ससृजिषे सृक्षीष्ट स्रष्टा
स्रक्ष्यते असृष्ट असृक्षातां असृक्षत इत्यात् रंज रागे रज्यति रज्यते रज्येत रज्यतु रज्यतां अरज्यत् अरज्यत ररं
ज ररंजे रज्यात् रंक्षीष्ट रंक्तार रंक्ष्यति रंक्ष्यते अराङ्क्षीत् अराङ्क्तां अराङ्क्षुः अरंक्त अरंक्षातां अरंक्षत शपू
आक्रोशे शप्यति शप्यते शप्येत शप्यतु शप्यतां अशप्यत् अशप्यत शशाप शेपतुः शेपुः शेपिथ शेपे शप्ता
त् शप्सीष्ट शप्ता शप्तारौ शप्तासे शप्स्यति शप्स्यते अशाप्सीत् अशाप्तां अशाप्सुः अशप्त अशप्सातां अशप्स
त णह बंधने नह्यति नह्यते नह्येत् नह्येत ननाह नेहतुः नहिथ नहोधः इति हस्वथः ननद्ध नह्यात् नत्सी
ष्ट नद्धार नत्स्यति नत्स्यते अनात्सीत् अनाद्धां अनात्सुः अनद्ध अनत्सातां अनत्सत मृष तितिक्षायां मृष्य
ति मृष्यते ममर्षे ममृषे मृष्यात् मर्षिषीष्ट मर्षितार मर्षिष्यति मर्षिष्यते अमर्षीत् अमर्षिषां अमर्षिष्ट अम
र्षिषातां शक मर्षणे शक्यति शक्यते शशाक शेकतुः शेकिथ शेके शेकाते शेकिरे शक्यात् शकिषीष्ट श
किताऽ अशाकीत् अशाकिषां अशकिष्ट अशकिषातां इत्युभे दिवादिश्च षुञ् अभिषवे स्वादेर्नुः चतुर्षु ।
नृपः सुनोति सुनुतः सुन्वंति सुनोषि सुनुथः सुनुथ सुनोमि गुणो वा लोपः सुन्वः सुनुवः सुनुते सुन्वाते सु

प्र० ज्ञ० नुषे सुन्वाथे सुनुध्वे सुन्वे सुनुवहे सुनुयात् सुन्वीत सुनोतु सुनुतात् सुनुतां सुन्वंतु उतो वा हेः सुनु सुनुतात् ।
१९ सुनुत सुनुत सुनवानि सुनुतां सुन्वातां सुन्वतां सुनुष्व सुनुध्वं सुनवै असुनोत् असुनुतां असुन्वन् असुनोः
असुनुत असुनुत असुनुव असुनुव असुनुत असुन्वातां असुन्वत सुषाव सुषुवतुः सुषविथ सुषुवे सुषुवा
ते सुषुविरे सुषुविषे सूयात् सोषीष्ट सोता२ सोष्यति सोष्यते असावीत् असोष्ट असोषातां षिञ् बंधने सिनो
ति सिनुते सिनुयात् सिन्वीत सिनोतु सिनुतां असिनोत् असिनुत सिषाय सिष्ये सीयात् सेषीष्ट सेता२ सेष्य
ति सेष्यते असैषीत् असेष्ट चिञ् चयने चिनोति चिनुते चिनुयात् चिन्वीत चिनोतु चिनुतां अचिनोत् अ
चिनुत चिणोतेर्णिद्वो कि वाँ चिकाय चिचाय चिक्ये चीयात् चेषीष्ट चेता२ चेष्यति चेष्यते अचैषीत् अ
चेष्ट स्तृञ् आच्छादने स्तृणोति स्तृणुते स्तृणुयात् स्तृण्वीत स्तृणोतु स्तृणुतां अस्तृणोत् अस्तृणुत तस्ता
र तस्तरतुः स्तर्यात् स्तृषीष्ट स्तर्ता२ स्तरिष्यति२ अस्तार्षीत् अस्तृत अस्तृषातां वृञ् वरणे वृणोति वृणुते
वृणुयात् वृण्वीत वृणोतु वृणुतां अवृणोत् अवृणुत ववार ववरतुः ववरुः वृञ्स्थपदर् ववरिथ ववृवि
यात् वरिषीष्ट वरिता२ वरिष्यति वरिष्यते अवारीत् अवरिष्ट धुञ् धूञ् कंपने धुनोति धुनुते धुनुया
त् धुन्वीत धुनोतु धुनुतां अधुनोत् अधुनुत दुधाव दुधुवे धूयात् धोषीष्ट धोता२ धोष्यति धोष्यते अधौ।
षीत् अधोष्ट धूनोति धूनुते धूनुयात् धून्वीत दुधाव दुधुवतुः दुधविथ दुधुवे धूयात् धविषीष्ट धवि
ता२ धविष्यति धविष्यते अधावीत् अधविष्ट ष्टुने आप्लृ व्याप्तौ आप्नोति आप्नुतः आप्नुवंति आप्नुयात् १९

आप्नोतु आप्नुहि आप्नोत् आप आपतुः आपुः आप्यात् आप्ता आप्स्यति आपत् दंभु दंभने दभ्नोति दभ्नुतः द-
भ्नुवंति दभ्नुयात् दभ्नोतु अदभ्नोत् ददंभ ददंभतुः ददंभिथ दभ्यात् दंभिता अदंभीत् शक्लृ शक्तौ शक्नोति श-
क्नुतः शक्नुवंति शक्नुयात् शक्नोतु अशक्नोत् अशक्नुवन् शशाक शेकतुः शक्यात् शक्ता शक्ष्यति अशकत्
क्षि हिंसायां क्षिणोति क्षिणुतः क्षिण्वंति क्षिणुयात् क्षिणोतु अक्षिणोत् चिक्षाय क्षीयात् क्षेता क्षेष्यति अक्षै-
षीत् इति पं अथ उ॰ अशू व्याप्तौ संघाते च अश्नुते अश्नुवाते अश्नुवते अश्नुवीत अश्नुतां आश्नुत आनशे आनशा-
ते आनशिरे आनशिषे आनशे अशिषीष्ट अष्टा अशिता अशिष्यते अक्ष्यते आशिष्ट आष-
१० ष्ट इत्यात्स्वादिष्व रुधिर् आवर्णे रुधादेर्नम्स्याच्च तुष्षु रुणद्धि नमसोस्य रुंद्धः रुंधंति रुणत्सि रुंद्धः रुंद्ध
रुणध्मि रुंध्वः २ रुंधे रुंधाते रुंधते रुंत्से रुंधाथे रुंध्वे रुंधे रुंध्वहे रुंध्यात् रुंधीत रुणद्धु रुंद्धां रुंधंतु रुंधि
रुंधतां० रुंद्धि रुंद्ध रुणधानि रुंद्धां रुंधातां अरुणत् २ अरुंद्धां अरुंधन् अरुंद्ध अरुंधातां अरुंधत रुरोध रुरुधतुः
रुरोधिथ रुरुधे रुरुधाते रुरुधिरे रुध्यात् रुत्सीष्ट रोद्धा २ रोत्स्यति रोत्स्यते अरौत्सीत् अरौद्धां अरौत्सु
अरुधत् अरुद्ध अरुत्सातां अरुत्सत भिदिर् विदारणे भिनत्ति भिंत्तः भिंदंति भिंते भिंदाते भिंदते भिं-
द्यात् भिंदीत भिनत्तु भिंत्तां भिंदंतु भिंत्तां भिंदातां भिंदतां अभिनत् अभिंत्तां अभिंदन् अभिनः अभिं-
त्तं अभिंत्त अभिनदं अभिंत अभिंदातां अभिंदत बिभेद बिभिदतुः बिभेदिथ बिभिदे भिद्यात् भित्सी-
ष्ट भेत्ता २ भेत्स्यति भेत्स्यते अभैत्सीत् अभिदत् अभित्त अभित्सातां छिदिर् द्वैधीकरणे छिनत्ति छि

धा०रु०
२०

त्तः छिंदंति छिंते छिंद्यात् छिंदीत छिनत्तु छिंतां अछिनत् अछिंत चिछेद चिछिदे छिद्यात् छित्सीष्ट छेत्ता २
छेत्स्यति छेत्स्यते अछैत्सीत् अछिदत् अछित्त विजिर् पृथग्भावे विनक्ति विंक्तः विंजंति विंक्ते विंज्यात् विंजी
त विनक्तु विंक्तां अविनक् २ अविंक्त विवेज विविजे विज्यात् विक्षीष्ट वेक्ता २ वेक्ष्यति वेक्ष्यते अवैक्षीत् अवि
जत् अविक्त अविक्षातां युजिर् योगे युनक्ति युंक्ते युंज्यात् युंजीत युनक्तु युंक्तां अयुनक् २ अयुंक्त युयोज युयु
जे युज्यात् युक्षीष्ट योक्ता २ योक्ष्यति २ अयौक्षीत् अयुक्त इत्युने शिष्लृ विशेषणे शिनष्टि शिंष्टः शिंषंति शिंष्या
त् शेष्टा शेक्ष्यति अशिषत् पिष्लृ संचूर्णने पिनष्टि पिंष्यात् पिनष्टु अपिनट् २ पिपेष पिष्यात् पेष्टा पेक्ष्यति अपिष
त् भंजो आमर्दने श्नमः श्नम्प्रत्ययात्परस्य नस्य लोपः स्यात् भनक्ति भंक्तः भंजंति भंज्यात् भनक्तु अभनक् २ अभंक्तां अभ
जन् बभंज बभंजतुः बभंजिथ बभंक्थ भज्यात् भंजिता भंक्ता भंजिष्यति भंक्ष्यति अभंजीत् अभांक्षीत् अभांक्
अभांक्तुः भुज पालनाभ्यवहारयोः भुनक्ति भुंज्यात् भुनक्तु अभुनक् २ बुभोज भुज्यात् भोक्ता भोक्ष्यति अभौक्षी
त् अभौक्त हिसि हिंसायां इदितो नुम् श्नमः इति न लोपः हिनस्ति हिंस्तः हिंसंति हिंस्यात् हिनस्तु हिंस्तां हिं
संतु सलोपः हिंधि हिंस्तं हिनसानि अहिनः अहिंस्तां अहिंसन् जिहिंस जिहिंसतुः हिंस्यात् हिंसिता अहिंसी
त् अंजू व्यक्तिम्रक्षणकांतिगतिषु अनक्ति अंक्तः अंजंति अनक्षि अंक्थः अंज्यात् अनक्तु अंक्तां अंजंतु अंग्धि
अंक्तं अनजानि आनक् २ आंक्तां आंजन् आनंज आनंजिथ आनक्थ अज्यात् अंजिता अङ्क्ता अंजिष्यति अ
ङ्क्ष्यति अंजेः सिचि नित्यमिट् आंजीत् आंजिष्टां आंजिषुः वृजी वर्जने वृणक्ति वृंक्तः वृंजंति वृणक्षि वृंज्यात् वृणक्तु
अवृणक् २ अवृंक्तां अवृंजन् ववर्ज वृज्यात् वर्जिता अवर्जीत् पृची संपर्के पृणक्ति पृंज्यात् पृणक्तु पृंग्धि अपृणक् २
२०

शिनष्टु
शिंष्टां शिंषंतु शिं
ड्ढि शिंष्टं शिनषा
णि अशिनट् २
अशिंष्टां अशिंषन्
शिशेष शिष्यात

धी

अपृंक्तां अपृंचन् पपर्च पृच्यात् पर्चिता पर्चिष्यति अपर्चिष्यत् अपर्चीत् इतिपं ञिइंधी दीप्तौ इंद्धे इंधाते इंधते इंत्से इंधीत ऐंद्ध इंधांचक्रे इंधिषीष्ट इधितासे ऐंधिष्ट खिद दैन्ये खिंत्ते खिंदीत खिंत्तां अखिंत्त अखिंदातां चिखिदे खित्सीष्ट खेत्तासे खेत्स्यते अखित्त अखित्सातां अखित्सत विद विचारणे विंत्ते विंदीत विंत्तां अविंत्त विविदे वित्सीष्ट वेत्तासे वेत्स्यते अवित्त अवित्सातां अवित्सत इत्यात्रुधादिश्च तनु विस्तारे तनादेरुः पूकर्त्तेरिव तनुषु तनोति तनुतः तन्वंति तनोषि तनुथः तनुथ तनोमि तन्वः तनुवः तनुते तन्वाते तन्वते तनुषे तन्वाथे तनुध्वे तन्वे तन्वहे तनुवहे तनुयात् तन्वीत तनोतु तनुतां तन्वंतु तनुत तनुतात् तनुत तनवानि तनुतां तन्वातां तन्वतां अतनोत् अतनुतां अतन्वन् अतनुत अतन्वातां अतन्वत ततान तेनतुः तेनिथ तेने तेनाते तेनिरे तेनिषे तन्यात् तनिषीष्ट तनिता२ तनिष्यति तनिष्यते अतानीत् तनादेस्तनथासोर्वा सेर्लोपः लोपस्त्वनुदात्ततनमिति नलोपः अतत अतनिष्ट अतनिषातां अतनिषत अतथाः अतनिष्ठाः अतनिषाथां अतनिढ्वं अतनिषि अतनिष्वहि षणु दाने सनोति सनुते सनुयात् सन्वीत सनोतु सनुतां असनोत् असनुत ससान सेनतुः सेनिथ सेने सेनाते सेनिरे सन्यात् सनिषीष्ट सनिता२ सनिष्यति सनिष्यते असानीत् असत असनिष्ट असथाः असनिष्ठाः डुकृञ् करणे करोति ङित्यदुः करोतेरत उत्स्यात् ङिति कुरुतः कुर्वंति कुरुच्छुरोर्न दीर्घः करोषि कुरुथः कुरुथ करोमि कृञो नित्यं म्वोरुलोपो वक्तव्यः कुर्वः कुर्मः कुरुते कुर्वाते कुर्वते कुरुषे कुर्वाथे कुरुध्वे कुर्वे कुर्वहे कृञो ये कृञः परस्य उलो लोपो ये परे कुर्यात् कुर्यातां कुर्युः कुर्वीत कुर्वीयातां कुर्वीरन् करोतु कुरुतात् कुरुतां कुर्वंतु कुरु कुरुतात् कुरुतं कुरुत करवाणि कुरुतां कुर्वातां कुर्वतां कुरुष्व कुर्वाथां कु

प्र०न०रुध्वं करवै करवावहै अकरोत् अकुरुतां अकुर्वन् अकरोः अकुरुतं अकुरुत अकरवं अकुर्व अकुरुत अकुर्वातां
२१ अकुर्वत अकुरुथाः अकुर्वाथां अकुरुध्वं अकुर्वि अकुर्वहि चकार चक्रतुः चक्रुः चकर्थ चक्रे चक्राते चक्रिरे चकृ
षे चक्राथे चकृढ्वे चक्रे चकृवहे क्रियात् कृषीष्ट कर्त्ता२ करिष्यति करिष्यते अकरिष्यत् अकरिष्यत अकार्षी
त् अकार्ष्टां अकार्षुः अकृत अकृषातां अकृषत क्षणु क्षिणु हिंसायां क्षणोति क्षणुतः क्षण्वंति क्षणुते क्षण्वा
ते क्षण्वते क्षणुयात् क्षण्वीत क्षणोतु क्षणुतां अक्षणोत् अक्षणुत चक्षाण चक्षणे क्षण्यात् क्षणिषीष्ट क्षणिता२
क्षणिष्यति क्षणिष्यते अक्षणीत् अक्षत अक्षणिष्ट अक्षणिषातां अक्षणिषत अक्षथाः अक्षणिष्ठाः तनादेरुप
धाया गुणो वाऽपि क्षिणोति क्षेणोति क्षिणुयात् क्षेणुयात् क्षिण्वीत क्षेण्वीत क्षिणोतु क्षेणोतु अक्षिणोत् अक्षेणोत्
चिक्षेण चिक्षिणतुः चिक्षिणे क्षिण्यात् क्षेणिषीष्ट क्षेणिता२ अक्षेणीत् अक्षित अक्षेणिष्ट ऋणु गतौ ऋ
णोति अर्णोति ऋणुतः अर्णुतः ऋणुयात् अर्णुयात् ऋण्वीत ऋणोतु ऋर्णोतु ऋणुतां अर्णुतां आर्णोत् आ अ
नर्ण आनृणतुः आनृणुः आनृणे आनृणाते आनृणिरे ऋण्यात् अर्णिषीष्ट अर्णिता२ आर्णीत् आर्त आ
र्णिष्ट तृणु अदने तृणोति तर्णोति तृणुते तर्णुते तृणुयात् तर्णुयात् तृण्वीत तर्ण्वीत तृणोतु तर्णोतु तृ
णुतां तर्णुतां अतृणोत् अतर्णोत् अतृणुत अतर्णुत ततर्ण ततृणतुः ततृणे तृण्यात् तर्णिषीष्ट तर्णिता
तर्णिष्यति तर्णिष्यते अतर्णीत् अतर्त अतर्णिष्ट अतर्णिषातां अतर्णिषत डत्नुने वनु याचने वनोति व
नुतः वन्वंति वनोषि वनुथः वन्वः२ वनुयात् वनोतु अवनोत् अवनुतां अवन्वन् ववान ववनतुः वव
निथ वन्यात् वनिता अवानीत् इतिपं मनु अवबोधने मनुते मन्वीत मनुतां अमनुत मेने मेनाते मेनिरे मं
सीष्ट मंता२ अमत अमंसातां अमंसत इति तनादिः तुद व्यथने तुदादेरः कर्त्तरि चतुर्षु तुदति तुदतः तुद २१

ति तुदसि तुदथः तुदामि तुदते तुदेते तुदंते तुदेत् तुदेतां तुदेयुः तुदेः तुदेतं तुदेत तुदेयं तुदेव तुदेत तुदेयातां तुदेरन् तुदतु तुदतां तुदंतु तुद तुदतात् तुदतं तुदत तुदानि तुदतां तुदेतां तुदंतां अतुदत् अतुदतां अतुदन् अतुदत अतुदेतां अतुदंत तुतोद तुतुदतुः तुतुदुः तुतोदिथ तुतुदे तुतुदाते तुतुदिरे तुतुदिषे तुद्यात् तुत्सीष्ट तोत्ता तोत्स्यति तोत्स्यते अतौत्सीत् अतौत्तां अतौत्सुः अतुत्त अतुत्सातां दिश अतिसर्जने दिशति दिशते दिशेत् दिशेत दिशतु दिशतां अदिशत् अदिशतां अदिशन् दिदिश दिदिशतुः दिदेशिथ दिदिशे दिश्यात् दिक्षीष्ट देष्टा २ देक्ष्यति देक्ष्यते अदिक्षत् अदिक्षतां भ्रस्ज पाके ग्रहांक्ङिति चेति संप्रसारणे रु वैजवाः स्तोः श्चुना श्चुः भृज्जति भृज्जतः भृज्जंति भृज्जते भृज्जेते भृज्जंते भृज्जेत् भृज्जेत भृज्जतु भृज्जतां अभृज्जत् भ्रस्जोरसोरनप्य वा बभर्ज्ज बभ्रज्ज क्ङिति संप्रसारणमेव बभृज्जतुः बभृज्जुः बभर्जिथ बभ्रज्जिथ बभष्ठ बभ्रज्जथुः बभृज्जे बभृजाते बभृजिरे भृज्ज्यात् छशषराजादेरिति जस्य षत्वं षढोः कः सि भर्क्षीष्ट स्कोराद्योश्चेति सलोपः भ्रक्षीष्ट भर्ष्टा भ्रष्टा भर्क्ष्यति भ्रक्ष्यति अभार्क्षीत् अभार्ष्टां अभार्क्षुः अभ्राक्षीत् अभ्राष्टां अभ्राक्षुः अभर्ष्ट अभर्क्षातां अभर्क्षत अभर्ष्ठाः अभ्रष्ट अभ्रक्षातां अभ्रक्षत क्षिप प्रेरणे क्षिपति क्षिपते क्षिपेत् क्षिपेत क्षिपतु क्षिपतां अक्षिपत् अक्षिपतां अक्षिपन् अक्षिपत चिक्षेप चिक्षिपतुः चिक्षेपिथ चिक्षिपे चिक्षिपाते क्षिप्यात् क्षिप्सीष्ट क्षेप्ता २ क्षेप्स्यति क्षेप्स्यते अक्षैप्सीत् अक्षैप्तां अक्षैप्सुः अक्षिप्त अक्षिप्सातां कृष विलेखने कृषति कृषते कृषेत् कृषेत कृषतु कृषतां अकृषत् अकृषत चकर्ष चकृषतुः चकर्षिथ चकृषे चकृषाते कृष्यात् कृक्षीष्ट

प्र०२० कर्ता२ कर्त्स्यति कर्त्स्यते अकृंतत् अकृंततां अकृंतन् अकृंतत अकृंतेतां अकृंतंत मिल संगमे मिलति
२२ मिलते मिलेत् मिलेत मिलतु मिलतां अमिलत् अमिलत मिमिल मिमिलतुः मिमिले मिमिलाते मिल्यात् मेलि
षीष्ट मेलिता२ मेलिष्यति मेलिष्यते अमेलिष्यत् अमेलिष्यत अमेलीत् अमेलिष्ट मुच्लृ मोक्षणे मुचादेर्मुम्
मुच लुप विद लिप सिच कृत पिश खिदां शप्रत्यये मुमागमः स्याद्धातोश्चतुर्षु मुंचति मुंचते मुंचेत् मुंचेत मुंचतु अमुंचत् मुमो
च मुमुचे मुच्यात् मुक्षीष्ट मोक्ता२ मोक्ष्यति मोक्ष्यते अमोक्ष्यत् अमोक्ष्यत अमुचत् अमुक्त अमुक्षातां लुप्लृ छेदे लु
पति लुंपते लुंपेत् लुंपेत लुंपतु लुंपतां अलुंपत् अलुंपत लुलोप लुलुपतुः लुलोपिथ लुलुपे लुप्यात् लुप्सीष्ट
लोप्ता२ लोप्स्यति लोप्स्यते अलुपत् अलुप्त विद्लृ लाभे विंदति विंदते विंदेत् विंदेत विंदतु विंदतां अविंदत्
अविंदत विवेद विविदतुः विविदे विद्यात् वेदिषीष्ट वेदिता२ वेदिष्यति वेदिष्यते अविदत् अवेदिष्ट
षिच क्षरणे सिंचति सिंचते सिंचेत् सिंचेत सिंचतु सिंचतां असिंचत् असिंचत सिषेच सिषिचे सिच्यात् सि
क्षीष्ट सेक्ता२ सेक्ष्यति सेक्ष्यते असिचत् असेक्षीत् असेक्तां असेक्षुः असिचत असिक्त असिक्षातां लिप उप
देहे लिंपति लिंपते लिलेप लिलिपे लिप्यात् लिप्सीष्ट लेप्ता२ अलिपत् अलिप्त६तुने ओव्रश्चू छेदने ग्र
हाकुडिति च लिति संप्रसारणं वृश्चति वृश्चेत् वृश्चतु अवृश्चत् वव्रश्च ववृश्चतुः वव्रश्चिथ वव्रष्ठ वृश्च्यात् व्रश्चि
ता व्रष्टा व्रश्चिष्यति व्रक्ष्यति अव्रश्चीत् अव्रश्चिष्टां अव्राक्षीत् अव्राष्टां अव्राक्षुः लुभ विमोहने लुभति लुलोभ
लोभिता अलोभीत् व्यच व्याजीकरणे विचति विचेत् विचतु अविचत् विव्याच विविचतुः विव्यचिथ विव्यथ वि

२२

ऋंफति ऋंफेत्
ऋंफतु ऋंफांच
कार ऋंफ्यात्
ऋंफिता ४

व्यात् व्यचिता व्यचिष्यति अव्याचीत् अव्याचिष्टां अव्याचिषुः तृप तृप्तौ तृपति तृपेत् तृपतु अतृपत् ततर्प ततृपतुः
ततर्पिथ तृप्यात् तर्पिता तर्पिष्यति अतर्पीत् शुन शुंन गमनार्थे शुनति शुशोन शुन्यात् शोनिता शोनिष्यति अशो-
नीत् शुंनति शुशुंन शुंन्यात् शुंनिता अशुंनीत् ऋफ ऋंफ हिंसायां ऋफति ऋफेत् ऋफतु आर्फत् आनर्फ ऋफ्या-
त् आर्फिता आर्फीत् गुफ गुंफ ग्रंथे गुफति गुफेत् गुफतु अगुफत् जुगोफ गुफ्यात् गोफिता अगोफीत् गुंफति
जुगुंफ गुंफ्यात् गुंफिता अगुंफीत् दृभी ग्रंथे दृभति दृभेत् दृभतु अदृभत् ददर्भ ददृभतुः ददर्भिथ दृभ्यात् द-
र्भिता दर्भिष्यति अदर्भीत् कृती छेदने मुचादेर्नुम् कृंतति कृंतेत् कृंततु अकृंतत् चकर्त चकृततुः चक-
र्तिथ कृत्यात् कर्तिता कर्तिष्यति अकर्तीत् अकर्तिष्टां कुट कौटिल्ये कुटति कुटादेर्ञ्णिङ्जेः प्रत्ययो ङित् चु-
कोट चुकुटतुः चुकुटिथ कुट्यात् कुटिता कुटिष्यति अकुटीत् पुट संश्लेषणे पुटति पुपोट पुपुटिथ पु-
टिता अपुटीत् कुच संकोचने कुचति चुकोच चुकुचिथ कुचिता अकुचीत् गुज शब्दे गुजति जुगोज जु-
गुजिथ गुजिता अगुजीत् छुर छेदने छुरति चुछोर चुछुरिथ छुर्यात् छुरिता अछुरीत् इत्यादि कुटादयः
गृ निगरणे गिरति गिरेत् गिरतु अगिरत् गिरतेः रेरस्य लो वा गिलति गिलेत् जगार जगरतुः जगरिथ गी-
र्यात् गरिता गरिष्यति अगारीत् अगारिष्टां अगालीत् अगालिष्टां अगालिषुः स्पृश संस्पर्शने स्पृशति स्पृ-
शेत् स्पृशतु अस्पृशत् पस्पर्श पस्पृशतुः पस्पर्शिथ स्पृश्यात् स्प्रष्टा स्प्रक्ष्यति अस्प्राक्षीत् अस्प्राष्टां अस्प्रा-
क्षुः अस्पृक्षत् टुमस्जो शुद्धौ मज्जति मज्जेत् मज्जतु अमज्जत् ममज्ज ममज्जतुः ममज्जिथ मज्ज्यात् मज्जिन

शोषे। ऐनुम मंक्ता मङ्क्ष्यति अमाङ्क्षीत् अमाङ्क्तां अमाङ्क्षुः प्रछ ज्ञीप्सायां पृच्छति पृच्छेत् पृच्छतु अपृच्छत्
पप्रच्छ पप्रच्छतुः पप्रच्छिथ पृच्छ्यात् प्रष्टा प्रक्ष्यति अप्राक्षीत् अप्राष्टां अप्राक्षुः विछ गतौ आयः विच्छायति वि
च्छायेत् विच्छायतु अविच्छायत् विच्छायांचकार विविच्छ विविच्छतुः विच्छ्यात् विच्छायिता विच्छिता विच्छा
यिष्यति विच्छिष्यति अविच्छायीत् अविच्छीत् अविच्छिषां इष इच्छायां इच्छति इच्छेत् इच्छतु ऐच्छत् इयेष ईषतुः
इयेषिथ इष्यात् एषिता एषिष्यति ऐषिष्यत् ऐषीत् ऐषिष्टां ऐषिषुः विश प्रवेशने विशति विशेत् विशतु
अविशत् विवेश विविशतुः विवेशिथ विश्यात् वेष्टा वेक्ष्यति अविक्षत् रुजो भंगे रुजति रुरोज रुज्यात्
रोक्ता रोक्ष्यति अरौक्षीत् अरौक्तां अरौक्षुः भुजो कौटिल्ये भुजति बुभोज भोक्ता अभौक्षीत् अभौक्तां छुप स्प
र्शे छुपति चुछोप छोप्ता अछौप्सीत् अछौप्तां रुश रिश हिंसायां रुशति रुरोश रोष्टा अरुक्षत् रिशति रिरेश
रेष्टा अरिक्षत् लिश गतौ लिशति लिलेश लेष्टा अलिक्षत् खिद परिघाते मुचादेर्नुम् खिंदति चिखेद चि
खिदतुः खिद्यात् खेत्ता खेत्स्यति अखेत्सीत् पिश अवयवे पिंशति पिपेश पिश्यात् पेशिता अपेशीत् मृश
आमर्शने मृशति मृशेत् मृशतु अमृशत् ममर्श ममृशतुः ममर्शिथ मृश्यात् मष्टा मक्ष्यति अमृक्षत् इति प
जुषी प्रीतिसेवनयोः जुषते जुषेते जुषंते जुषेत जुषेयातां जुषेतां जुषंतां अजुषत अजुषेतां अजुषंत जु
जुषे जुजुषाते जोषिषीष्ट जोषिता जोषिष्यते अजोषिष्ट ओलस्जी व्रीडे लज्जते लज्जेत लज्जतां अलज्जत
ललज्जे लज्जिषीष्ट लज्जितासे लज्जिष्यते अलज्जिष्ट अलज्जिषातां मृङ् प्राणत्यागे म्रियते लुङ्लिङोश्च

तुषीष्टात् अपक्षि ॥ ति ऋतो रिङ् स्यादप्रत्यये यक्किच्च तुधातोः म्रियते म्रियेत म्रियतां अम्रियत ममार मम्र
तुः मम्रुः ममर्थ मृषीष्ट मर्त्तासे मरिष्यति अमरिष्यत् अमृत अमृषातां दृङ् आदरे आद्रियते आद्रियेत आ
द्रियतां आद्रियत आदद्रे आदृषीष्ट आदर्त्तासे आदरिष्यते आदृत आदृषातां धृङ् अवस्थाने ध्रियते ध्रिये
त ध्रियेतां अध्रियत दध्रे दध्राते धृषीष्ट धर्त्तासे धरिष्यते अधृत अधृषातां इत्यात् तुदादिश्च डुक्रीञ् द्रव्य
विनमये ना क्र्यादेः श्नादेगेण नाम्ना चतुर्षु क्रीणाति ई हसे नाऽल्पस्यात ईत् ङिति हसे क्रीणीतः नातः ना
इत्यस्यातो लोपो ङिति स्वरे क्रीणंति क्रीणासि क्रीणीथः क्रीणामि क्रीणीवः क्रीणीते क्रीणाते क्रीणते क्रीणी
यात् क्रीणीत क्रीणातु क्रीणीतां अक्रीणात् अक्रीणीतां अक्रीणन् अक्रीणीत अक्रीणातां अक्रीणत
चिक्राय चिक्रियतुः चिक्रियुः चिक्रयिथ चिक्रिये चिक्रियाते क्रीयात् क्रेषीष्ट क्रेता २ क्रेष्यति क्रेष्यते अक्रै
षीत् अक्रैष्टां अक्रैषुः अक्रेष्ट अक्रेषातां अक्रेषत प्रीञ् तर्पणे कांतौ च प्रीणाति प्रीणीतः प्रीणंति प्रीणीते प्री
णीयात् प्रीणीत प्रीणातु प्रीणीतां अप्रीणात् अप्रीणीतां अप्रीणन् अप्रीणीत पिप्राय पिप्रियतुः पिप्रयि
थ पिप्रिये पिप्रियाते पिप्रियिरे प्रीयात् प्रेषीष्ट प्रेता २ प्रेष्यति प्रेष्यते अप्रैषीत् अप्रैष्टां अप्रेष्ट अप्रेषातां ग्रह
उपादाने गृह्णाति गृह्णीतः गृह्णंति गृह्णीते गृह्णीयात् गृह्णीत गृह्णातु गृह्णीतां गृह्णंतु हसादानहौ हसांतात् श्ना
स्थाने आनः स्याद्धौ परे गृहाण गृह्णीतं गृह्णानि गृह्णीतां अगृह्णात् अगृह्णीतां अगृह्णन् अगृह्णीत जग्राह
जगृहतुः जगृहुः जग्रहिथ जगृहे जगृहाते जगृहिरे गृह्यात् ग्रहिषीष्ट ग्रहीता २ ग्रहिष्यति ग्रहिष्यते अग्र
हीत् अग्रहिष्टां अग्रहिषुः अग्रहिष्ट अग्रहीष्ट पूञ् पवने पादेर्ह्रस्वः पादेर्धातोर्ह्रस्वः स्यात्श्वादौ परे पुनाति

पुनीतः पुनंति पुनीते पुनाते पुनंते पुनीयात् पुनीत पुनातु पुनीतां पुनंतु पुनीहि अपुनात् अपुनीत पुपाव पुपुवे पूया
त् पविषीष्ट पविता२ पविष्यति२ अपावीत् अपाविष्टां अपाविषुः अपविष्ट लूञ् छेदने लुनाति लुनीतः लुनंति लुनाते
लुनीयात् लुनीत लुनातु लुनीतां लुनंतु लुनीहि लुनीतां लुनातां अलुनात् अलुनीतां अलुनन् अलुनात लुला
व लुलुवतुः लुलुवुः लुलविथ लुलुवे लूयात् लविषीष्ट लविता२ लविष्यति२ अलावीत् अलविष्ट स्तृञ् आच्छाद
ने स्तृणाति स्तृणीतः स्तृणंति स्तृणीते स्तृणाते स्तृणंते स्तृणीयात् स्तृणीत स्तृणातु स्तृणीतां स्तृणंतु स्तृणीतां अ
स्तृणात् अस्तृणीतां अस्तृणन् अस्तृणीत तस्तार तस्तरतुः तस्तरुः तस्तरिथ तस्तरे स्तीर्यात् स्तरिषीष्ट स्तरिता२
स्तरिष्यति२ अस्तारीत् अस्तरिष्ट धूञ् कंपने धुनाति धुनीतः धुनंति धुनीते धुनीयात् धुनीत धुनातु धु
नीतां धुनंतु धुनीहि धुनीतां दुधाव दुधुवतुः दुधुवुः दुधविथ दुधुवे दुधुवाते दुधुविरे धूयात् धविषीष्ट ध
विता२ धविष्यति२ अधावीत् अधविष्ट शॄ हिंसायां शृणाति शृणीयात् शृणातु शृणीतां शृणंतु अ
शृणात् शशार शशरतुः शशरुः शशरिथ शीर्यात् शरिता शरिष्यति अशारीत् पॄ पालनपूरणयोः पृणाति प
णीयात् पृणातु अपृणात् पपार पपरतुः पपरिथ पोपूर पूर्यात् परिता परिष्यति अपारीत् वृञ् वरणे वृणा
ति वृणीयात् वृणातु अवृणात् ववार ववरतुः ववरिथ वूर्यात् वरिता अवारीत् जॄ वयोहानौ जृणाति
जृणीयात् जृणातु जृणीतां अजृणात् जजार जजरतुः जजरिथ जीर्यात् जरिता जरिष्यति अजारीत् गॄ निगा
रणे गृणाति गृणीयात् गृणातु अगृणात् जगार जगरतुः जगरिथ गीर्यात् गरिता अगारीत् नॄ नये नृणाति
नृणीयात् नृणातु नृणीहि अनृणात् ननार ननरतु ननरिथ नीर्यात् नरिता अनारीत् कॄ गतौ कृणाति

